A cavity, ravine, hole.-गर्त *m.*; रन्ध्र, कुहर, श्वभ्र, विवर, बिल *n.*

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।

Darkness, gloom.-अन्धकार *m.& n.*; ध्वान्तम् । तमिस्र, तिमिर, तमस् *n.*

ध्वान्ते गाढेऽन्धतमसं विष्वक् संतमसं तमः ॥१०३॥

Intense darkness.-अन्धतमस *n.*=गाढं ध्वान्तम्.

Utter or universal darkness.-संतमस *n.*= विष्वक् तमः ।

वासुकिः सर्पराट् शेषोऽनन्तोऽथाजगरः शयुः ।

The king of snakes.-वासुकि, सर्पराज् *m.*

The chief of the serpent race.-शेष, अनन्त *m.*

A large serpent.-अजगर, शयु *m.*

(सर्प+राज्=प० त०, syn. सर्पराज, नागराज.)

सर्पो भुजंगो भुजगो नाग आशीविषः फणी ।
दर्वीकरो द्विरसनो व्यालश्चक्षुःश्रवा अहिः ॥ १०४ ॥
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ।

Snake, serpent.-सर्प, भुजंग, भुजग, नाग, आशीविष, फणिन्, दर्वीकर, द्विरसन, व्याल, चक्षुःश्रवस्, अहि, उरग, पन्नग, भोगिन, जिह्मग, पवनाशन *m.*

(द्वे रसने यस्य सः=ब०; चक्षुषी एव श्रवसी यस्य=ब०; भोगोऽस्यास्तीति; पवन+अशन=ब०, syn. द्विजिह्व,

भोगधर, वाताशन; भुजं+गच्छति इति=भुजगः, भुजंगः or भुजंगमः=उ० त०.)

[सृप् 1 P. to creep,to go; अपसृप् to go away; उपसृप् to approach; संसृप् to flow; विसृप् to creep along, to go along.]

अहेः शरीरं भोगः स्यात् स्फटायां तु फणा द्वयोः॥१०५॥

The body of a snake.-भोग *m.*=अहेः शरीरम् ।

The expanded hood of a cobra.-स्फटा, फणा *f.* or फण *m.*

समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ।

The skin or slough of a snake.-कञ्चुक, निर्मोक *m.*

Poison.-क्ष्वेड *m.*; गरल, विष *n.*

विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः॥१०६॥

A dealer in antidotes against poison.-विषवैद्य, जाङ्गुलिक *m.*

Snake-catcher.-व्यालग्राहिन्, अहितुण्डिक *m.*

इति पातालभोगिवर्गः ।

नरको निरयश्चाथ यातना तीव्रवेदना ।

Hell, the infernal regions.–नरक, निरय *m.* Agony, excessive pain.–यातना, तीव्रवेदना *f.*

पीडा बाधा व्यथा दुःखकृच्छ्रकष्टानि त्रिष्वपि ॥१०७॥

Pain, anguish, misery, affliction.–पीडा, बाधा, व्यथा *f.*; दुःख, कृच्छ्र, कष्ट *n.* & *adj.*

(पीड् 10 P. to give pain, to afflict, to squeeze; with नि to press, to embrace; with उप to eclipse. बाध् 1 A. to oppose, to annoy, to grieve, to torment. व्यथ् 1 A. to tremble, to be afflicted, to fear; *Caus.* to afflict, to frighten.)

इति नरकवर्गः ।

समुद्रः सागरः सिन्धुः पारावारः सरित्पतिः ।
उदन्वानब्धिरुदधिस्तथा रत्नाकरोऽर्णवः ॥ १०८ ॥

Ocean, sea.–समुद्र, सिन्धु, सागर, पारावार, सरित्पति, उदन्वत, अब्धि, उदधि, रत्नाकर, अर्णव *m.*

[सरित्+पति=ष० त०; उदन्+वत् (possessive termination); अपो दधाति, उदकं दधाति च=अब्धि.

नदीपश्च; रत्न+आकर=प०त०, syn. सिन्धुपति; वाराशि or वारिराशि, अम्बुधि, जलधि, जलनिधि, इ०].

अापः स्त्री भूम्नि वार्वारि सलिलं जीवनं जलम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुपुष्करम् ॥ १०९ ॥
उदकं च पयः पाथस्त्रिषु द्वे आप्यमम्मयम् ।

Water.– अप् *f. pl.*, वार्, वारि, सलिल, जीवन, जल, अम्भस्, अर्णस्, तोय, पानीय, नीर, क्षीर, अम्बु, पुष्कर,* उदक, पयस्, पाथस् *n.*

Watery, aqueous.–आप्य, अम्मय *adj.*

(जीव् 1 P. to live; with अनु to depend upon, to survive; with उप to maintain oneself by, to subsist upon: with सम् *Cau.* to animate, to revive.)

(पा 1 P. (पिब्) to drink, to swallow; with नि to sip.)

भङ्गस्तरंग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ ११० ॥
महत्सूल्लोलकल्लोलौ स्याद्वावर्तोऽम्भसां भ्रमः ।

Wave.–भङ्ग, तरंग *m.*; ऊर्मि *m.* & *f.*; वीचि *f.*

A large wave, surge.–उल्लोल, कल्लोल *m.*= महानूर्मिः ।

Whirlpool.–आवर्त *m.*=अम्भसां भ्रमः ।

(भञ्ज् 7 P. to split, to break, to be disappointed.)

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्॥१११॥

A drop, spray.–पृषत् *n.*; बिन्दु, पृषत *m.*; विप्रुष् *f.*

तीरं रोधस्तटं कूलं तीरयोः पात्रमन्तरम् ।

Bank, shore.–तीर, रोधस् *n.*; तट *n.* (also *m.*), कूल *n.*

Basin.–पात्र *n.*=तीरयोरन्तरम् ।

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ।

An island.–द्वीप, अन्तरीप *m.* *n.*=वारिणोऽन्तर्यत्तटं तत् ।

तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ॥ ११२ ॥

A bank or island in a river.–पुलिन *n.*= तोयोत्थितम् ।

Sand-bank.–सैकत *n.*=सिकतामयं तीरम् ।

जलोच्छ्वासाः परीवाहाः पङ्के जम्बालकर्दमौ ।

A channel made to carry off water from an overflowing pond.–जलोच्छ्वास, परीवाह *m.*

Mud, mire.–पङ्क *m.* & *n.*; जम्बाल, कर्दम *m.*

उडुपं तु प्लवः पोतः स्त्रियां नौस्तरणिस्तरिः ॥ ११३ ॥

A raft or small boat.–उडुप *n.*; प्लव, पोत *m.*

Boat, ship.–नौ *f.*; तरणि (or तरणी) *f.*, तरि (or तरी) *f.*

(तृ 1 P. to pass over, to cross; to accomplish, to fulfil; *Caus.* to save, to relieve; *Desider.* तितीर्ष to desire to pass over, &c; with अव to descend, to be incarnate, to descend down from heaven (like gods); with प्र *Caus.* to persuade, to deceive; with वि to grant, to give, to favor with, to give away.)

नाव्यं त्रिलिङ्गं नौतार्ये कर्णधारस्तु नाविकः ।

Navigable.–नाव्य, नौतार्य *adj.*

Helmsman.–कर्णधार, नाविक *m.*

नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ॥ ११३ ॥अ

An oar.–नौकादण्ड *m.*; क्षेपणी *f.*

A rudder, helm.–आरित्र *n.*; केनिपातक *m.*

सांयात्रिकः पोतवणिक्कूपको गुणवृक्षकः ।

A merchant who trades by sea.–सांयात्रिक, पोतवणिज *m.*

The mast of a ship.–कूपक, गुणवृक्षक *m.*

†त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ।

Clear, clean.–प्रसन्न, अच्छ *adj.* Muddy, dirty.–कलुष, अनच्छ, आविल *adj.*

निम्नं गभीरं गम्भीरं गाधोत्तानं विपर्यये ॥ ११४ ॥

Deep.–निम्न, गभीर, गम्भीर *adj.*

Shallow.–उत्तान, गाध *adj.*

अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ।

Unfathomable.–अगाध, अतलस्पर्श *adj.*

A fisherman.–कैवर्त, दाश, धीवर *m.*

अथ मत्स्यो झषो मीनो यादांसि जलजन्तवः ॥११५॥

Fish.–मत्स्य, झष, मीन *m.*

Aquatic animal.–यादस् *n.*; जलजन्तु *m.*

स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।

Crab.–कुलीर, कर्कटक *m.*

Tortoise.–कूर्म, कमठ, कच्छप *m.*

नक्रो ग्राहः स्त्रियां शुक्तिः शंखः स्यात्कम्बुरस्त्रियौ ॥११६॥

A crocodile.–नक्र, ग्राह *m.*

A shell.–शुक्ति *f.*

A conch-shell.–शंख, कम्बु *m.* & *n.*

---

† त्रिष्वागाधात् *i. e.* from प्रसन्न to अगाध the words are *adj.*

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।

A frog.–भेक, मण्डूक, वर्षाभू *f.*; शालूर, प्लव, दर्दुर *m.*

जलाशया जलाधारास्तत्रागाधजलो ह्रदः ॥ ११७ ॥

A tank, reservoir of water.–जलाशय, जलाधार *m.*

A deep lake.–ह्रद *m.*=अगाधजलो जलाशयः ।

(आधार *m.* a bund, a canal.)

पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः ।

A lake.–पद्माकर *m.*; तडाग *m.* & *n.*; कासार *m.*; सरसी *f.*; सरस् *n.*

वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ॥ ११८ ॥

Pond, pool.–वेशन्त *m.*; पल्वल, अल्पसरस् *n.*

A well with steps.–वापी, दीर्घिका *f.*

पुंस्येवान्धुः प्रहिः कूप उदपानं च पुंसि वा ।

A well.–अन्धु, प्रहि, कूप *m.*; उदपान *m.* *n.*

खेयं तु परिखाऽऽवाप आलवालं नदी सरित् ।

तरंगिणी शैवलिनी तटिनी निम्नगापगा ॥ ११९ ॥

Ditch, trench.–खेय *n.*; परिखा *f.*

A basin for water round a tree.–आवाप *m.*; आलवाल *n.*

A river.–नदी, सरित्, तरंगिणी, शैवलिनी, तटिनी, निम्नगा, आपगा *f*.

भागीरथी त्रिपथगा त्रिस्रोता जाह्नवी तथा ।

The Ganges.–भागीरथी, त्रिपथगा, त्रिस्रोतस्, जाह्नवी *f*.

कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥

The Yamuna or Jamna river.–कालिन्दी, यमुना, सूर्यतनया, शमनस्वसृ *f*.

कृत्रिमाऽल्पा सरित्कुल्या संभेदः सिन्धुसंगमः ॥१२०॥

A small artificial channel.–कुल्या *f*.=अल्पा कृत्रिमा सरित् । (कृत्रिम *adj*. artificial.)

Mouth of a river; or confluence.–संभेद *m*. =सिन्धुसंगमः ।

स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ।
इन्दीवरं च नीलेऽस्मिन् सिते कुमुदकैरवे ॥ १२१ ॥

A water-lily, lotus. – उत्पल, कुवलय *n*. Blue lotus.– नीलाम्बुजन्मन्, इन्दीवर *n*.

White lotus.–कुमुद, कैरव *n*.

वा पुंसि पद्मं नलिनमरविन्दं सरोरुहम् ।
पङ्केरुहं तामरसं शतपत्रं कुशेशयम् ॥ १२२ ॥
कमलं चापि राजीवपुष्कराम्भोरुहाणि च ।

Lotus (in general).–पद्म *n*. & *m*.; नलिन, अरविन्द, सरोरुह, पङ्केरुह, तामरस, शतपत्र, कुशेशय, कमल, राजीव, पुष्कर, अम्भोरुह *n*.

(सरसि, पङ्के, अम्भसि वा रोहति इति सरोरुहादयः= उ० त०; शतं पत्राणां यस्य तत्=ब०, syn. सरसिज, सरोज, पङ्कज, सहस्रपत्र, अम्भोज, अब्ज.)

[रुह 1 P. to grow; आरुह to ascend; अवरुह to descend, to alight; अधिरुह to mount on.]

पुण्डरीकं कोकनदं शैवालं शैवलोऽपि तत् ॥ १२३ ॥

White lotus.–पुण्डरीक *n*.

Red lotus.–कोकनद *n*.

Moss.–शेवाल (or शै०) *m*., शैवल *m*.

मृणालं तु बिसं नालमस्त्री किञ्जल्ककेसरौ ।

Fibres in a lotus.–मृणाल, बिस *n*.

Stalk of a lotus.–नाल *m*. & . *n*.

Filaments or pollen of a lotus.–किञ्जल्क, केसर *m*.

कुमुद्वती कुमुदिनी नलिन्यां पद्मिनीमुखाः ॥ १२४ ॥

The plant of white lotus.–कुमुद्वती, कुमुदिनी *f*.

Common lotus plant.–नलिनी, पद्मिनी, कमलिनी इ० *f*.

इति वारिवर्गः ।

भूर्भूमिः पृथिवी क्षोणी रसा विश्वंभरा क्षितिः ।
धरा धरित्री धरणिः क्ष्माऽवनिर्मेदिनी मही ॥
वसुंधरोर्वी वसुधा जगती सागराम्बरा ॥ १२५ ॥

The earth.–भू, भूमि, पृथिवी (or पृथ्वी), क्षोणी, रसा, विश्वंभरा, क्षिति, धरा, धरित्री, धरणि, क्ष्मा, अवनि, मेदिनी, मही, वसुंधरा, उर्वी, वसुधा, जगती, सागराम्बरा *f*.

विश्वं बिभर्ति इति=उ० त०; वसूनि+धारयति इति=उ० त०, वसु *n*. a jewel; सागर एवाम्बरं यस्याः सा=ब०, syn. लोकधात्री, वसुमती, रत्नगर्भा, रत्नसू, समुद्रवसना इ०.

मृन्मृत्तिका चोर्वरा तु सस्याढ्याऽथोषरेतरा ।

Soil, earth.–मृद्, मृत्तिका *f*.

Fertile soil.–उर्वरा *f*. or *adj*.=सस्याढ्या ।

Barren or saline soil.–ऊषरा *f*. or *adj*.= सस्यविहीना ।

त्रिष्वथो जगती लोको विष्टपं भुवनं जगत् ॥ १२६ ॥

The world.–जगती *f*.; लोक *m*.; विष्टप, भुवन, जगत् *n*.

नीवृज्जनपदो देशविषयौ तूपवर्तनम् ।

An inhabited country, kingdom.–नीवृत्, जनपद *m*.

A country, region.–देश, विषय *m*.; उपवर्तन *n*.

सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥१२७॥

(A country) governed by a good king.–राजन्वत् *adj*.

(A country) ruled by a king.–राजवत् *adj*.

शाद्वलः शादहरिते सजम्बाले तु पङ्किलः ।

Green with grass, verdant.–शाद्वल, शादहरित *adj*.

Muddy, marshy.–सजम्बाल, पङ्किल *adj*.

गोष्ठं गोस्थानकं चैव वल्मीकं पुन्नपुंसकम् ॥१२७॥ भ

Cow-pen.–गोष्ठ, गोस्थानक *n*.

Ant-hill.–वल्मीक *m*. & *n*.

पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान् ।

Skirts.–पर्यन्तभू *f*.; परिसर *m*.

Bridge, mound, bund.–सेतु *m*.; आलि *f*.

अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ॥ १२८ ॥

सरणिः पद्धती रथ्या शृङ्गाटकचतुष्पथे ।

Road, path, way.–अयन, वर्त्मन् *n.*; मार्ग, अध्वन्, *पथिन् *m.*, पदवी, सृति, सरणि, पद्धति, रथ्या *f.*
Crossing of roads.– शृङ्गाटक, चतुष्पथ *n.*

दुर्गमं वर्त्म कान्तारं विपथः कापथः समौ ॥ १२९ ॥

Wilderness, difficult pass.–कान्तार *n.* = दुर्गमं वर्त्म ।

Bad road.–विपथ, कापथ *m.*

गव्यूतिः स्त्री क्रोशयुगं सुपन्थास्त्वपि सत्पथः ।

Two koss.–गव्यूति *f.*=क्रोशयुग *n.*
(क्रोश *m.*=a koss).

Good road.–सुपथिन्, सत्पथ *m.*

द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ॥

The earth and the sky.–द्यावापृथिवी *f. du.*; द्यावाभूमि *f. du.*; रोदसी *f. du.*; रोदस *n. du.*

इति भूमिवर्गः ।

पूः स्त्री पुरीनगर्यौ वा स्थानीयं पत्तनं तथा ॥ १३० ॥

Town, city.–पुर् *f.*; पुरी *f.* or पुर *n.*; नगरी *f.* or नगर *n.*; स्थानीय, पत्तन *n.*

आपणस्तु निषद्यायां विपणिः पण्यवीथिका ।

Shop.–आपण *m.*; निषद्या *f.*

Market.–विपणि *f.*=पण्यवीथिका *f.*

वप्रं चयोऽथ प्राकारो भित्तिः स्त्री कुड्यमेव च ॥१३१॥

A mud-wall.–वप्र *n.*; चय *m.*

An enclosure or rampart.–प्राकार *m.*

Wall, partition.–भित्ति *f.*; कुड्य *n.*

गृहं गेहं च सदनं भवनागारमन्दिरम् ।
निकेतनं वेश्म सद्म निशान्तं निलयालयौ ॥ १३२ ॥

House, dwelling.–गृह, गेह, सदन, भवन, अगार, मन्दिर, निकेतन, वेश्मन्, सद्मन्, निशान्त *n.*; निलय, आलय *m.*

(ली 1, 10, 9 P. to adhere, to dwell, to live; with नि to lie down, to hide oneself.)

वासः कुटी सभा शाला पर्णशालोटजोऽस्त्रियाम् ।

A house, hall, a shed.–वास *m.*; कुटी, सभा, शाला *f.*

Hermitage, hut.–पर्णशाला *f.*; उटज *m.* & *n.*

गर्भागारं वासगृहं वाजिशाला तु मन्दुरा ॥ १३३ ॥

The middle of a house, sleeping-room.–गर्भागार, वासगृह *n.*

Stable.–वाजिशाला, मन्दुरा *f.*

(वस् 1 P. to dwell, to live; with अधि to

inhabit; with उप to observe a fast, to fast; with निस् *Cau.* to banish; with प्र to travel, to go abroad.)

मठश्छात्रादिनिलयो गञ्जा तु मदिरागृहम् ।

A school or building inhabited by students or ascetics; a monastery.–मठ *m.*= छात्रादीनां निलयः ।

A tavern.–गञ्जा *f.*; मदिरागृह *n.*

कुट्टिमोऽस्त्री निबद्धाभूश्चन्द्रशाला शिरोगृहम् ॥१३३अ

A floor or ground paved or plastered – कुट्टिम *m.* & *n.*=निबद्धा भूः ।

An apartment on the house-top, terrace.– चन्द्रशाला *f.*; शिरोगृह *n.*

आवेशनं शिल्पिशाला प्रपा पानीयशालिका ।

Workshop, manufactory.–आवेशन *n.*; शिल्पिशाला *f.*

A place where water is distributed, cistern.–प्रपा, पानीयशालिका *f.*

वातायनं गवाक्षोऽथ सौधोऽस्त्री भूपमन्दिरम् ॥१३४॥

Window.–वातायन *n.*; गवाक्ष *m.*

Palace.–सौध *m.* & *n.*; भूपमन्दिर *n.*

हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम् ।

Mansion.–हर्म्य *n.*=धनिनां वासः ।

Royal palace or temple.–प्रासाद *m.*=देवभूभुजां वासः ।

अन्तःपुरं तु शुद्धान्तश्चावरोधोऽथ देहली ॥ १३५ ॥

Harem.–अन्तःपुर *n.*; शुद्धान्त, अवरोध *m.*

Threshold.–देहली *f.*

गोपानसी तु वलभी चत्वरे त्वजिराङ्गने ।

Roof.–गोपानसी, वलभी *f.*

Compound, quadrangle.–चत्वर, अजिर, अङ्गन *n.*

स्त्री द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ॥१३६ ॥

Door, entrance.–द्वा *f.*; द्वार *n.*; प्रतीहार *m.*

A raised seat.–वितर्दि, वेदिका *f.*

तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ।

A front door, an ornamental arch.–तोरण *m.* & *n.*=बहिर्द्वारम् ।

A town-gate–पुरद्वार, गोपुर *n.*

कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ॥

The leaf or panel of a door.–कपाट, अरर *n.*

A wooden bolt to fasten the door.–अर्गल

f. & *n.*=कपाटस्य विष्कम्भः। (विष्कम्भ *m.* Obstacle, hindrance; & therefore the bolt of a door.)

आरोहणं स्यात्सोपानं ग्रामसंवसथौ समौ ॥ १३७ ॥

A staircase.–आरोहण, सोपान *n.*

A village.–ग्राम, संवसथ *m.*

संमार्जनी शोधनी स्यात्संकरोऽवकरस्तथा ।

Broom, brush.–संमार्जनी, शोधनी *f.*

Sweepings, dust –संकर, अवकर *m.*

इति पुरवर्गः ।

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ॥ १३८ ॥

अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।

Mountain, **hill**.–महीध्र, शिखरिन् , क्ष्माभृत, अहार्य, धर, पर्वत, अद्रि, गोत्र, गिरि, ग्रावन्, अचल, शैल- शिलोच्चय *m.*

(महीं धारयति, क्ष्मां बिभर्ति, गां त्रायते, इ०=महीध्रादयः उ० त०, syn. महीधर, भूधर, धराधर, भूभृत, महीभृत.)

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषद् ॥ १३९ ॥

Stone, **rock**.–पाषाण, प्रस्तर, ग्रावन्, उपल, अश्मन् *m.*; शिला, दृषद *f.*

कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः ।

Top, summit.–कूट *m. & n.*; शिखर, शृङ्ग *n.*

Cliff, precipice.–प्रपात, अतट, भृगु *m.*

कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियाम् ॥१४०॥

The side or ridge of a mountain.–कटक *m. & n.*=अद्रेर्नितम्बः ।

Table-land, level land on the top of a mountain.–स्नु, प्रस्थ *m.*; सानु *m. & n.*

धातुर्मनःशिलाद्यद्रेः पादाः प्रत्यन्तपर्वताः ।

उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ॥ १४१॥

Ore, mineral, metal.–धातु *m.*

Foot of a mountain.–पाद *m.*=प्रत्यन्तपर्वतः ।

Cascade, waterfall.–उत्स *m.*; प्रस्रवण *n.*

Spring, fountain.–वारिप्रवाह, निर्झर, झर *m.*

दरी तु कन्दरो वा स्त्री गह्वरं तु गुहा स्मृता ।

Valley, vale.– दरी *f.*; कन्दर *m.* or कन्दरा *f.*

Cave, den.–गह्वर *n.*; गुहा *f.*

निकुञ्जकुञ्जौ वा क्लीबे खनिः खानी तथाकरः ॥१४२॥

Grove, bower.–निकुञ्ज, कुञ्ज *m. & n.*

A mine.–खनि, खानी *f.*; आकर *m.*

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ।

Land near the foot of a mountain.-उपत्यका *f.*=अद्रेरासन्ना भूमिः ।

Land on the upper part of a mountain.-अधित्यका *f.*=अद्रेरूर्ध्वं भूमिः ।

इति शैलवर्गः ।

अटव्यरण्यं विपिनं गहनं काननं वनम् ॥ १४३ ॥

Forest, wilderness, jungle.-अटवी *f.*; अरण्य, विपिन, गहन, कानन, वन *n.*

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।

A garden, a grove.-आराम *m.*; उपवन *n.*

पुमानाक्रीड उद्यानमङ्कुरोऽभिनवोद्भिदि ॥ १४४ ॥

A royal or public garden.-आक्रीड *m.*; उद्यान *n.*

A Sprout.-अङ्कुर *m.*=अभिनवोद्भिद ।

वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः ।

Row.-वीथी, आलि, आवलि, पङ्क्ति, श्रेणी (or ०णि) *f.*

Continuous or thick line.-लेखा, राजि *f.*

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ॥ १४५ ॥

अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः ।

Tree.–वृक्ष, महीरुह, शाखिन्, विटपिन्, पादप, तरु, अनोकह, कुट, शाल, पलाशिन्, द्रु, द्रुम, अगम *m*.

वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली ।

Barren, fruitless.–वन्ध्य (बन्ध्य), अफल, अवकेशिन् *adj*.

Bearing fruit, fruitful.–फलवत्, फलिन, फलिन् *adj*.

(फल् 1 P. to produce, to bear fruits; With प्रति to be reflected.)

त्रिषु फुल्ले विकसितोन्मीलितौ विकचस्फुटौ ॥ १४६ ॥

Blown, opened.–फुल्ल, विकसित, उन्मीलित, विकच, स्फुट *adj*.

(फुल्ल् 1 P. to blossom, to open. मील् 1 P. to close, to wink, to close the eyes: मीलय *Caus*. to close, to shut; उन्मील् to be opened as eyes or a flower, to open; समुन्मील् to open of itself, to spring up, to rise; निर्मील् to close, to shut, to be covered. स्फुट् 6 P. & 1 A. to burst, to open, to expand.)

लता तु वल्ली व्रततिः सा वीरुधा प्रतानिनी ।

Creeper.–लता, वल्ली, व्रतति *f*.

A spreading creeper.–वीरुध् *f.*=प्रतानिनी लता।

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ॥ १४७ ॥

Height; loftiness.-आरोह, उच्छ्राय, उत्सेध, उच्छ्रय *m.*=नगादीनामारोहः।

अस्त्री प्रकाण्डः स्कन्धः स्यात् समे शाखालते तथा।

The trunk of a tree.–प्रकाण्ड *m.* & *n.* स्कन्ध *m.*

Bough, branch.–शाखा, लता *f.*

शिरोग्रं शिखरं त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥१४८॥

The top or crown of a tree.–शिरस्, अग्र, शिखर *n.*

Bark.–त्वच् *f.*: वल्क, वल्कल *m.* & *n.*

ग्रन्थिर्ना पर्वपरुषी स्तम्बगुल्मौ शिफाजटे।

A knot, a joint in a cane or body.–ग्रन्थि *m.*; पर्वन्, परुस् *n.*

Shrub.–स्तम्ब, गुल्म *m.*

A fibrous root.–शिफा, जटा *f.*

काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम्।

Wood.– काष्ठ, दारु *n.*

Fuel,dry wood.– इन्धन,एधस्, इध्म *n.*; एध *m.*: समिध् *f.* (इन्ध् 7 A. to kindle.)

निष्कुहः कोटरं वा ना वल्लरिर्मञ्जरिः स्त्रियौ ॥१४९॥

The hollow of a tree.–निष्कुह *m*.; कोटर *n*. & *m*.

Shoot, sprout, blossom.–वल्लरि, मञ्जरि or मञ्जरी *f*.

पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् ।

Leaf, foliage.–पत्र, पलाश, छदन, दल, पर्ण *n*.; छद *m*.

पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम् ॥१५०॥

A twig full of young leaves.– पल्लव *m*. & *n*.; किसलय *n*.

The extension of a tree.– विस्तार *m*.; विटप *m*. & *n*.

वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम् ।

Crops, harvest.–सस्य *n*.=वृक्षादीनां फलम् ।

Stalk, stem.–वृन्त *n*.=प्रसवबन्धनम् ।

स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियाम्॥१५१॥

Bunch, nosegay.–गुच्छक, स्तबक *m*.

An opening bud.–कुड्मल *m*., मुकुल *m*. & *n*.

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।

Flower –सुमनस् *f. pl.*; पुष्प, प्रसून, कुसुम, सुम *n.*

मकरन्दः पुष्परसः परागः सुमनोरजः ॥ १५२ ॥

The nectar of a flower.–मकरन्द *m.*=पुष्परसः।
Pollen.–पराग *m.*=सुमनसां रजः ।

कोरकः पुंसि कलिका मन्दारः पारिजातकः ।

Bud.–कोरक *m.*; कलिका *f.*
A kind of tree.–मन्दार, पारिजातक *m.*

आम्रश्चूतो रसालोऽपि सहकारोऽथ वेतसे ॥ १५३ ॥
शीतवञ्जुलवानीराः पलाशे पर्णकिंशुकौ ।

Mango tree.–आम्र, चूत, रसाल, सहकार *m.*
The Ratan reed.–वेतस, शीत, वञ्जुल, वानीर *m.*
The Palas'a tree.–पलाश, पर्ण, किंशुक *m.*

अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ॥१५४॥

The creeper *Mogra*.–अतिमुक्त, पुण्ड्रक *m.*; वासन्ती, माधवी, लता *f.*

सुमना मालती जातिः सप्तला नवमालिका ।

The creeper jasmine.–सुमना (or सुमनस्), मालती, जाति *f.*

A creeper.–सप्तला, नवमालिका *f.*

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥१५५॥

The vine; also grape.–मृद्वीका, गोस्तनी, द्राक्षा, स्वाद्वी, मधुरसा *f.*

अस्त्री कुशं कुथो दर्भो वंशो वेणुश्च कीचकः ।

A kind of grass.–कुश *m.* & *n.*; कुथ, दर्भ *m.*

Bamboo tree, a bamboo.–वंश, वेणु, कीचक *m.*

शष्पं बालतृणं घासो यवसं तृणमर्जुनम् ॥ १५६ ॥

Young grass.– शष्प, बालतृण *n.*

Meadow or pasture grass.– घास *m.*; यवस *n.*

Grass in general.– तृण, अर्जुन *n.*

(घस 1 P. to devour, to eat).

अश्वत्थः पिप्पलो बिल्वः श्रीफलोऽथाप्युदुम्बरः ।
अम्लिका तिन्तिडी चिञ्चा कर्कन्धूर्बदरी तथा॥१५६ अ

The Indian fig-tree.– अश्वत्थ, पिप्पल *m.*

The *Bel* tree or its fruit.– बिल्व, श्रीफल *m.*

The glomerous fig-tree.– उदुम्बर *m.*

The tamarind tree.– अम्लिका, तिन्तिडी, चिञ्चा *f.*

The jujube tree.– कर्कन्धू, बदरी *f.*

इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्यथ केसरे ॥१५६॥ आ
बकुलो वञ्जुलोऽशोके समौ करकदाडिमौ ।

The **name** of a plant.– इङ्गुदी *f.*; तापसतरु *m.*

The **birch-tree**.– भूर्ज, चर्मिन्, मृदुत्वच् *m.*

The *betel*-**plant**.– ताम्बूलवल्ली, ताम्बूली, नागवल्ली *f.*

The *Bakul* tree.– केसर, बकुल *m.*

The *Asoka* tree.– वञ्जुल, अशोक *m.*

The **pomegranate tree**.– करक, दाडिम *m.*

नीपः कदम्बः प्रियको बन्धूको बन्धुजविकः ॥१५६॥इ

The *Kadamba* tree.– नीप, कदम्ब, प्रियक *m.*

The *Bandhuka* plant.– बन्धूक, बन्धुजविक *m.*

अथ शोणे कुरबकस्तथा पीते कुरण्टकः ।
नालिकेरो नारिकेलस्तापिच्छस्तु तमालकः ॥ १५६ ॥ ई

A crimson species of Amaranth, its flower (when neuter).– कुरबक *m.* & *n.*

The yellow species of Amaranth.– कुरण्टक *m.*

The cocoanut tree.– नालिकेर, नारिकेल *m.*

The *tamala* tree, with dark blossoms.– तापिच्छ, तमाल *m.*

रसालेक्षू तुम्ब्यलाबू रम्भा तु कदली स्त्रियाम् ।

The sugar-cane.–रसाल, इक्षु *m.*

The gourd creeper.– तुम्बी, अलाबू *f.*
The plantain tree.– रम्भा, कदली *f.*

खदिरो रक्तसारश्च चम्पको हेमपुष्पकः ॥ १५६ ॥ उ

The *Khadira* tree.– खदिर, रक्तसार *m.*;
The *Champaka* tree.– चम्पक, हेमपुष्पक *m.*

कुन्दं शिरीषं धत्तूरः केतकी मल्लिका जपा ।
प्रियङ्गुः पूग एरण्डः शमी चामलकी तथा ॥१५६॥ऊ

A kind of jasmine.– कुन्द *n.*
The *Sirisha* tree.– शिरीष *n.*
The *Dhattura* tree.– धत्तूर *m.*
The *Ketaka* tree.– केतकी *f.*
The *Mogri*-plant.– मल्लिका *f.*
The *jasvanda* plant.– जपा *f.*
The *Priyangu*-plant.– प्रियङ्गु *m.*
The betel-nut tree.– पूग *m.*
The castor oil plant.– एरण्ड *m.*
The *Sami* tree.– शमी *f.*
A kind of tree.– आमलकी *f.*

पलाण्डुर्लशुनो मुस्ता दूर्वा श्यामाक एव च ।

An onion.– पलाण्डु *m.*
Garlic.– लशुन *m.*

A kind of grass.– मुस्ता *f.*

A kind of grass.– दूर्वा *f.*

A sort of grain.– श्यामाक *m.*

जम्बूः स्त्री पुंसि जम्बीरः कर्कटी शाल्मलिर्द्वयोः॥ १५६॥ ऋ

A fruit tree.– जम्बू *f.*

The citron tree.– जम्बीर *m.*

The cucumber.– कर्कटी *f.*

The silk-cotton tree.– शाल्मलि *m.* & *f.*

इति वनौषधिवर्गः ।

शार्दूलद्वीपिनौ व्याघ्रे कण्ठीरवमृगद्विषौ ।
सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ॥१५७॥

Tiger.– शार्दूल, द्वीपिन्, व्याघ्र *m.*

Lion.– कण्ठीरव, मृगद्विष, सिंह, मृगेन्द्र, पञ्चास्य, हर्यक्ष, केसरिन्, हरि *m.*

(मृग+द्विष, मृग+इन्द्र=ष० त०; पञ्चं आस्यं यस्य=ब०. पञ्च *adj.* spreading, wide. केसरा अस्य सन्ति इति के०. केसर *m.* the mane of the lion or horse, Syn. मृगराज, मृगपति, पञ्चानन.)

कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वराहः कोलसूकरौ ॥ १५८ ॥

Monkey.– कपि, प्लवंग, प्लवग, शाखामृग, वलीमुख, मर्कट, वानर, कीश *m*.

(प्लवं गच्छति इति प्लवगः, प्लवंगः & also प्लवंगमः= उ० त०.)

Hog.– वराह, कोल, सूकर *m*.

भल्लूक ऋक्षो महिषे लुलायश्चाथ जम्बुके ।

शृगालो वञ्चकः क्रोष्टा कोकस्त्वीहामृगो वृकः ॥१५९॥

Bear.– भल्लूक, ऋक्ष *m*.

Buffalo.– महिष, लुलाय *m*.

Fox, jackal.– जम्बुक, शृगाल, वञ्चक, क्रोष्टु *m*.

Wolf.– कोक, ईहामृग, वृक *m*.

ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ।

A cat.– ओतु, बिडाल, मार्जार, वृषदंशक, आखुभुज् *m*.

[दंश (दश) 1 P. to bite; with परि to bite through, to bite violently; with सम् to press together, to crush, to pinch.]

चमूरुकृष्णसारैणकुरङ्गहरिणा मृगे ॥ १६० ॥

Deer, antelope.– चमूरु, कृष्णसार (or ०शार), एण, कुरङ्ग, हरिण, मृग *m*.

रुरुसारंगपृषता अन्याश्च मृगजातयः ।

Different kinds of deer or antelope.–
रुरु, सारंग, पृषत, इ० *m*.

कृमिकीटौ क्षुद्रजन्तौ वृश्चिकः शूककीटकः ॥ १६०॥ अ

Insect, worm.– कृमि, कीट *m*.=क्षुद्रजन्तुः ।

A scorpion, a caterpillar.-वृश्चिक, शूककीट *m*.

ऊर्णनाभस्तन्तुवाय आखुस्तन्दुरमूषकौ ।

A spider.– ऊर्णनाभ, तन्तुवाय *m*.

A mouse.– आखु, उन्दुर (or उन्दुरु), मूषक *m*.

(ऊर्णु 2 P. A. to cover. मूष् 1 P. or मुष् 1, 9 P. to steal.)

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥

The king of birds, eagle.– गरुत्मत्, गरुड, तार्क्ष्य, वैनतेय, खगेश्वर *m*.

पारावतः कलरवः कपोतोऽथ शशादनः ॥ १६१ ॥
पत्री श्येन उलूकस्तु वायसारातिपेचकौ ।
दिवान्धः कौशिको घूको दिवाभीतो निशाटनः॥१६२॥

A pigeon, dove.– पारावत, कलरव, कपोत *m*.

A hawk, falcon.– शशादन, पत्रिन, श्येन *m*.

Owl.– उलूक, वायसाराति, पेचक, दिवान्ध, कौशिक, घूक, दिवाभीत, निशाटन *m*.

(निशायां अटति इति निशाटनः; अट् 1 P. to

roam, to wander; with परि to wander about, to make a tour).

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ।

A cock.– कृकवाकु, ताम्रचूड, कुक्कुट, चरणायुध *m*.

चटकः कलविङ्कः स्याद् बलाका बिसकण्ठिका ॥१६३॥

Sparrow.– चटक, कलविङ्क *m*.

A kind of crane.– बलाका, बिसकण्ठिका *f*.

वनप्रियः परभृतः कोकिलः पिक इत्यपि ।

Cuckoo.–वनप्रिय, परभृत, कोकिल, पिक *m*. (पर+भृत=तृ० त०, syn. परपुष्ट.)

काकस्तु बलिभुग् ध्वाङ्क्षो वायसो मौकुलिस्तथा ॥१६४॥

Crow.–काक, बलिभुज, ध्वाङ्क्ष, वायस, मौकुलि *m*. (बलि भुङ्क्ते =उ० त०, syn. बलिपुष्ट.)

आतापिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ समौ ।

A kite.– अतापिन्, चिल्ल *m*.

A vulture.– दाक्षाय्य, गृध्र *m*.

A parrot.– कीर, शुक *m*.

क्रुङ् क्रौञ्चोऽथ बकः कह्वः पुष्कराह्वस्तु सारसः ॥१६५॥

Heron.– क्रुञ्च, क्रौञ्च *m*.

A crane.– बक, कह्व *m*.

A kind of crane.–पुष्कराह्व, सारस *m*.

कोकश्चक्रश्चक्रवाकः कादम्बः कलहंसकः ।

Ruddy goose.– कोक, चक्र, चक्रवाक *m.*

A kind of goose.– कादम्ब, कलहंस *m.*

हंसभेदो राजहंसो मल्लिकाक्षस्तथाऽपरः ॥ १६६ ॥

Flamingo; swan.– हंस *m.*

Kinds of swans.–राजहंस, मल्लिकाक्ष *m.*

समौ चातकसारंगौ दंशस्तु वनमक्षिका ।

The *chataka* bird.– चातक, सारंग *m.*

A gad-fly, a large wasp.– दंश *m.*; वनमक्षिका *f.*

वरटा त्वपि गन्धोली सरघा मधुमक्षिका ।

Wasp.– वरटा, गन्धोली *f.*

Bee.– सरघा, मधुमक्षिका *f.*

समौ पतंगशलभौ खद्योतो ज्योतिरिङ्गणः ॥ १६७ ॥

A grass-hopper.– पतंग, शलभ *m.*

Glow-worm, firefly.– खद्योत, ज्योतिरिङ्गण *m.*

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।

द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ १६८ ॥

A bee.– मधुव्रत, मधुकर, मधुलिह, मधुप, अलिन्, द्विरेफ, पुष्पलिह, भृङ्ग, षट्पद, भ्रमर, अलि *m.*

मयूरो बर्हिणो बर्ही नीलकण्ठो भुजंगभुक ।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥ १६९ ॥

A peacock.- मयूर, बर्हिण, बर्हिन्, नीलकण्ठ, भुजंगभुज , शिखावल, शिखिन्, मेघनादानुलासिन् *m*.

(भुजंगान् भुङ्क्त इति=उ० त० the snake-eater; नील+कण्ठ=ब०; शिखा, केका यस्यास्तीति=शिखी, केकी; मेघनादं अनुलसति इति=उ० त०; syn. भुजंगाशन, भुजंगद्विप, शितिकण्ठ, शिखण्डिन्)

केका वाणी मयूरस्य समौ चन्द्रकमेचकौ ।

Cry of the peacock.- केका *f*.=मयूरस्य वाणी ।

The eye on peacock's feathers.- चन्द्रक, मेचक *m*.

शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके ॥ १७० ॥

Crest.- शिखा, चूडा *f*.

Feathers, tail.- शिखण्ड *m*., पिच्छ, बर्ह *n*.

शकुन्तिरण्डजः पक्षी शकुन्तविहगद्विजाः ।
खगः पत्री विहायाश्च विर्विष्किरपतत्रयः ॥ १७१ ॥

A bird.- शकुन्ति, अण्डज, पक्षिन, शकुन्त, विहग, द्विज, खग, पत्रिन, विहायस्, वि, विष्किर, पतत्रि (or पतत्रिन्) *m*.

कारण्डवस्तित्तिरिश्च जीवंजीवश्चकोरकः ।

Different kinds of birds.– कारण्डव *m.*; तित्तिरि *m.*; जीवंजीव *m.*; चकोर *m.*

पक्षः पत्त्रं पतत्त्रं च चञ्चुस्त्रोटिरुभे स्त्रियौ ॥

A wing.– पक्ष *m.*; पत्त्र, पतत्त्र *n.*

Beak, bill.– चञ्चु, त्रोटि *f.*

पेशी कोशो द्विहीनेऽण्डं कुलायो नीडमस्त्रियाम् ॥ १७२ ॥

Egg.– पेशी *f.*; कोश *m.*; अण्ड *n.*

A nest.– कुलाय *m.*; नीड *m.* & *n.*

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।

A young, a child.– पोत, पाक, अर्भक, डिम्भ, पृथुक, शावक, शिशु *m.*

स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगलं युगम् ॥ १७३ ॥

A couple, a pair (male and female).– स्त्रीपुंस *m. du.*, मिथुन, द्वन्द्व *n.*

A pair.– युग्म, युगल, युग *n.*

समूहनिवहस्तोमसंदोहनिकरव्रजाः ।
समुदायश्च संघातः समवायश्चयो गणः ॥ १७४ ॥
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ।

A collection, group, flock, troop, herd, crowd.– समूह, निवह, स्तोम, संदोह, निकर, व्रज, समु-

दाय, संघात, समवाय, चय, गण *m.*; संहति *f.*; वृन्द, निकुरम्ब, कदम्बक *n.*

वृन्दभेदाः समैर्वर्गः संघसार्थौ तु जन्तुभिः ॥ १७५ ॥
सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकम् ।

A class, species.– वर्ग *m.*=समैर्वृन्दम् ।

Flock of animals.– संघ, सार्थ *m.*=प्राणिभिः सजातीयैर्विजातीयैर्वा वृन्दम् ।

A collection or flock of animals of the same kind.– कुल *n.*

Herd, flock.– यूथ *m.* & *n.*=तिरश्चां वृन्दम् ।

पुञ्जो राशिश्चोत्करश्च कूटं स्यात्पुन्नपुंसकम् ।

A heap.– पुञ्ज, राशि, उत्कर *m.*; कूट *m.* & *n.*

गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥ १७६ ॥

Tame or domesticated (bird or beast).
– छेक, गृह्यक *adj.*=गृहासक्तः पक्षी मृगो वा ।

इति सिंहादिवर्गः ।

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।

Man.– मनुष्य, मानुष, मर्त्य, मनुज, मानव, नर *m.*

स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १७७ ॥

Male.– पुंस्, पञ्चजन, पुरुष, पूरुष, नृ *m.*

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ १७८ ॥

Woman, female.- स्त्री, योषित्, अबला, योषा, नारी, सीमन्तिनी, वधू, प्रतीपदर्शिनी, वामा, वनिता, महिला *f.*

विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥१७९॥
सुन्दरी रमणी रामा कोपना सैव भामिनी ।
वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ १८० ॥

Words denoting varieties of women but now used in the general sense of a beautiful woman.- मानिनी *f.*=one indignant towards her lover. कोपना, भामिनी *f.*=Passionate or angry-tempered woman. (वामे लोचने यस्याः सा=ब० ; वरौ आरोहौ यस्याः सा=ब० one of excellent hips. Syn. वामनयना, वराङ्गी.)

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ।
भार्या जायाऽथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी॥१८१॥
पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता ।

Wife.- पत्नी, पाणिगृहीती, द्वितीया, सहधर्मिणी, भार्या, जाया *f.*; दार *m. pl.*

Matron.– कुटुम्बिनी, पुरन्ध्री *f.*

A chaste or faithful wife.– सुचरित्रा, सती, साध्वी, पतिव्रता *f.*

कृताभिषेका महिषी कन्या तु स्यात्कुमारिका॥ १८२॥

A crowned queen.–महिषी *f.*= कृताभिषेका नृपस्त्री।

A girl.– कन्या, कुमारी or कुमारिका *f.*

पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी।
स्वैरिणी पांशुला च स्यात्तरुणी युवतिः समे॥ १८३॥

An unchaste woman, harlot.– पुंश्चली, धर्षिणी, बन्धकी, असती, कुलटा, इत्वरी, स्वैरिणी, पांशुला *f.*

A young woman.– तरुणी, युवति *f.*

रजस्वला पुष्पवती स्याद्रजः पुष्पमार्तवम्।

A woman in her courses.– रजस्वला, पुष्पवती *f.*

The menses.– रजस्, पुष्प, आर्तव *n.*

पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः।

A widow re-married.– पुनर्भू, दिधिषू *f.*= द्विरूढा।

The husband of a re-married widow.– दिधिषु *m.*=तस्याः पतिः।

कान्तार्थिनी तु या याति संकेतं साभिसारिका ॥ १८३ अ

A woman who makes or keeps an assignation.– अभिसारिका *f.*= या कान्तार्थिनी०. (संकेत *m.* assignation .)

पत्यौ देशान्तरगते यार्त्ता प्रोषितभर्तृका ।

A woman whose husband is gone to a distant country.– प्रोषितभर्तृका *f.*

आयात्यन्योपभोगाङ्कैर्यस्या उषसि तु प्रियः ॥ १८३ ॥ आ
खण्डिता साऽथावमन्य पतिं या परितप्यते ।
कलहान्तरिता सा स्याद्विप्रलब्धा तु सा भवेत् ॥ १८३ ॥ इ
अनालोक्य पतिं खिन्ना या संकेतनिकेतने ।

खण्डिता *f.*= A woman whose lover has been false to the appointment and is suspected of inchastity; a disappointed and offended woman.

कलहान्तरिता *f.*= A woman who has been angry with her lover, but afterwards repents for it; a penitent woman.

विप्रलब्धा *f.*=A woman whose lover is false to his appointment or engagement, a woman deceived by her lover.

ाविलम्बिनि प्रिये चिन्ताव्याकुलोत्कण्ठिता भवेत् ।

उत्कण्ठिता *f.*=A woman whose lover has too long delayed going to the appointed place and is therefore full of anxiety and suspicion.

आज्ञापरः प्रियो यस्याः स्वाधीनपतिका च सा ॥१८३॥ ई

स्वाधीनपतिका *f.*= A woman who has much influence over her husband.

अथ प्रियसङ्केतितदिनमिति शृङ्गारपूर्णसामग्रीम् ।
सज्जीकरोति या स्त्री वासकसज्जेति सा प्रोक्ता॥१८३॥उ

वासकसज्जा *f.*= A woman dressed with all her ornaments and making decorations to receive her lover on the appointed day.

समाः स्नुषाजनीवध्वो विश्वस्ता विधवा समे ।

A daughter-in-law.- स्नुषा, जनी, वधू *f.*

widow.- विश्वस्ता, विधवा *f.*

आलिः सखी वयस्याथ पतिवत्नी सभर्तृका ॥ १८४ ॥

A female friend.- आलि, सखी, वयस्या *f.*

A woman having her husband living.- पतिवत्नी, सभर्तृका *f.*

वृद्धा स्त्री तु पलिक्नी स्याद् दूतीसंचारिके समे ।

An old **woman.**– वृद्धा, पलिक्नी *f.*

A female **messenger.**– दूती, संचारिका *f.*

वारस्त्री गणिका वेश्या कुट्टिनी शम्भली समे ॥१८५॥

A public woman.– वारस्त्री, गणिका, वेश्या *f.*

A bawd, **a** go-between.– कुट्टिनी, शम्भली *f.*

आपन्नसत्त्वा स्याद् गुर्विण्यन्तर्वत्नी च गर्भिणी।

A pregnant **woman.**– आपन्नसत्त्वा, गुर्विणी, अन्तर्वत्नी, गर्भिणी *f.*

पैतृष्वसेयः स्यात्पैतृष्वस्त्रीयश्च पितृष्वसुः ॥ १८६ ॥
सुतो मातृष्वसुश्चैवं वैमात्रेयो विमातृजः ।

Paternal aunt's son, **cousin.**– पैतृष्वसेय, पैतृष्वस्रीय *m.*

Maternal aunt's son, **cousin.**– मातृष्वसेय, मातृष्वस्रीय *m.*

Step-brother.– वैमात्रेय, विमातृज *m.*

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ॥१८७॥
आहुर्दुहितरं सर्वेऽपत्यं तोकं तथा समे ।

Son.– आत्मज, तनय, सूनु, सुत, पुत्र *m.*

Daughter.– आत्मजा, तनया, सूनु, सुता, पुत्री, दुहितृ *f.*

Offspring (male or female.).- अपत्य, तोक *n.*

स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पिता ॥ १८८ ॥

Legitimate son.- औरस, उरस्य *adj.*

Father.- तात, जनक, पितृ *m.*

जनयित्री प्रसूर्माता जननी भगिनी स्वसा ।

Mother.- जनयित्री, प्रसू, मातृ, जननी *f.*

Sister.- भगिनी, *स्वसृ *f.*

ननान्दा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥१८९॥

Husband's sister.- ननान्दृ *f.*=पत्युः स्वसा ।

Grand-daughter.- नप्त्री, पौत्री *f.*

भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।

Husband's brother's wife.- यातृ *f.*

पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः ॥१९०॥

Mother-in-law.- श्वश्रू *f.*

Father-in-law.- श्वशुर *m.*

पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ।

Paternal uncle.- पितृव्य *m.*=पितुर्भ्राता ।

Maternal uncle.- मातुल *m.*=मातुर्भ्राता ।

श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ ॥१९१॥

Wife's brother.- श्याल *m.*=पत्न्या भ्राता ।

Husband's brother.– देवृ, देवर *m.*=स्वामिनो भ्राता ।

स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः ।

Sister's son, nephew.– स्वस्रीय, भागिनेय *m.*

Son-in-law.– जामातृ *m.*=दुहितुः पतिः ।

पितामहः पितृपिता तत्पिता प्रपितामहः ॥ १९२ ॥

मातुर्मातामहाद्येवं सपिण्डाश्च सनाभयः ।

(1) Paternal and (2) maternal grand-father.– १. पितामह, पितृपितृ; २. मातामह *m.*

(1) Paternal and (2) maternal great grand-father.– १. प्रपितामह; २. प्रमातामह *m.*

A kinsman upto seventh remove.– सपिण्ड, सनाभि *m.*

समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ॥ १९३ ॥

Born of the same parents, (brother or sister).– समानोदर्य, सोदर्य, सगर्भ्य, सहज *adj.*

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ।

A relative.– सगोत्र, बान्धव, ज्ञाति, बन्धु, स्व, स्वजन *adj.*

धवः प्रियः पतिर्भर्ता जारस्तूपपतिः समौ ॥

Husband.– धव, प्रिय, पति, भर्तृ *m.*

A paramour, gallant.– जार, उपपति *m.*

भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरावुभौ ॥१९४॥

Brother's son.– भ्रात्रीय, भ्रातृज *m.*

Brother & sister.– भ्रातृ *m. dual.* (भ्रातृ *m.* brother.)

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।

Parents.– मातापितृ, पितृ, मातरपितृ प्रसूजनयितृ *m. du.*

श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥ १९५ ॥

Father and mother-in-law.– श्वश्रूश्वशुर, श्वशुर *m. du.*

Son and daughter.– पुत्र *m. du.*=पुत्रश्च दुहिता च.

दंपती जंपती जायापती भार्यापती च तौ ।

Husband and wife.– दंपती, जंपती, जायापती, भार्यापती *m. du.*

शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे ॥ १९६ ॥

Infancy, childhood.– शिशुत्व, शैशव, बाल्य *n.*

Youth.– तारुण्य, यौवन *n.*

स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्द्धकम् ।

Old age.– स्थाविर, वृद्धत्व, वार्द्धक *n.*

An assemblage of old folks.– वार्द्धक *n.*

स्यादुत्तानशयो डिम्भः स्तनपश्च स्तनंधयः॥१९६॥(अ)

An infant, a child.– उत्तानशय, डिम्भ, स्तनप, स्तनंधय *m.* or *adj.* [धे 1 P. to suck, to drink.]

पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा ।

Grayness of the hair.– पलित *n.*= जरसा केशादौ शौक्ल्यम् ।

Oldage.– विस्रसा, जरा *f.*

बालस्तु स्यान्माणवको वयस्यस्तरुणो युवा ॥ १९७ ॥

Child, boy or girl.– बाल, माणवक *m.*

Young, adult.– वयस्य, तरुण, युवन् *adj.*

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ।

Old, aged.– प्रवयस्, स्थविर, वृद्ध, जीन, जीर्ण, जरत् *adj.*

[जॄ 1, 4, 9 P. to grow old, to wear out.]

जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥ १९८ ॥

Younger.– जघन्यज, कनिष्ठ, यवीयस्, अवरज, अनुज *adj.*

पूर्वजस्त्वग्रजोऽग्रीयो बलवान्मांसलोंऽसलः ।

Elder.- पूर्वज, अग्रज, अग्रीय *adj*.
Strong, robust.- बलवत्, मांसल, अंसल *adj*.

तुन्दिलस्तुन्दिभस्तुन्दी खर्वो ह्रस्वश्च वामनः ॥ १९९॥

Fat, bulky.- तुन्दिल, तुन्दिभ, तुन्दिन् *adj*.
Dwarfish.- खर्व, ह्रस्व, वामन *adj*.

कुब्जः पङ्गुः कुणिः खञ्जो बधिरोन्धश्च केकरः ।
इत्येते विकलाङ्गाः स्युः भिषग्वैद्यौ चिकित्सके ॥२००

Hump-backed.- कुब्ज *m*.
Crippled, lame.- पङ्गु *m*.
Crippled in the arm.- कुणि *m*. *f*.
Lame or crippled in the leg.- खञ्ज *m*.
Deaf.- बधिर *m*. *f*.
Blind.- अन्ध *m*. *f*.
Squint-eyed.- केकर *m*.
Doctor, physician.- भिषज्, वैद्य, चिकित्सक *m*.

अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।

Health.- अनामय, आरोग्य *n*.
Healing, curing, administering or applying remedies.- चिकित्सा, रुक्प्रतिक्रिया *f*.
(चिकित्स् from कित् 1 P. A. to administer

remedies, to cure; with वि to doubt, to inquire.)

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ २०१ ॥

Medicine.– भेषज, औषध, भैषज्य *n.*; अगद, जायु *m.*

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।

Disease, illness.– रुज्, रुजा *f.*; उपताप, रोग, व्याधि, गद, आमय *m.*

क्षयः शोषश्च यक्ष्मा च कासस्तु क्षवथुः पुमान् ॥

Consumption.– क्षय, शोष, यक्ष्मन् *m.*

Cough.– कास, क्षवथु *m.*

(शुष् 4 P. to become dry, to be withered, to be afflicted.)

व्रणोऽस्त्रियामरुः क्लीबे पामपामे विचर्चिका ॥२०१॥ (अ)

A wound.– व्रण *m.*, *n.*; अरुस् *n.*

Itch.– पामन्, पामा, विचर्चिका *f.*

कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकस्तथा ॥२०२॥

Itch, itching, scratching.– कण्डू, खर्जू, कण्डूया *f.*

A boil, pustule.– विस्फोट, पिटक *m.*

वार्त्तो निरामयः कल्यो विकृतव्याधितातुराः ।

Recovered, cured.– वार्त्त, निरामय, कल्य *adj.*

Sick, ill.– विकृत, व्याधित, आतुर *adj.*

शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ॥ २०३ ॥
Semen.– शुक्र, तेजस, रेतस, बीज, वीर्य, इन्द्रिय *n.*
मायुः पित्तं कफः श्लेष्मा स्त्रियां तु त्वगसृग्धरा ।
Bile.– मायु *m.*; पित्त *n.*
Phlegm.– कफ, श्लेष्मन् *m.*
Skin.– त्वच्, असृग्धरा *f.*

सृणिका स्यन्दिनी लाला नाडी तु धमनिः शिरा ॥२०३ अ
Saliva, spittle.– सृणिका, स्यन्दिनी, लाला *f.*
An artery or vein.– नाडी, धमनि, शिरा *f.*

अन्त्रं पुरीतद् गुल्मस्तु प्लीहा पुंस्यथ वस्नसा ।
स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे ॥ २०४ ॥
The entrails.– अन्त्र, पुरीतत् *n.*
Spleen.– गुल्म, प्लीहन् *m.*
Muscles.– वस्नसा, स्नायु *f.*
The liver.– कालखण्ड, यकृत् *n.*

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।
Flesh.– पिशित, तरस, मांस, पलल, क्रव्य, आमिष *n.*
रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम् ॥ २०४ ॥ अ

Blood.– रुधिर, *असृज्, लोहित, अस्र, रक्त, क्षतज, शोणित *n*.

मूत्रं प्रस्रावोऽथ विष्ठा पुरीषं शमलं शकृत्।

Urine.– मूत्र *n*.; प्रस्राव *m*.

Fæces, excrement.–विष्ठा *f*.; पुरीष, शमल, शकृत *n*.

बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा॥

The substance of the heart.– बुक्का *f*.; अग्रमांस *n*.

Heart.– हृदय, * हृद् *n*.

Fat.– मेदस् *n*.; वपा, वसा *f*.

स्याच्छरीरास्थि कंकालः कपालः स्यात्तु कर्परः ॥२०५॥

Skeleton.– कंकाल *m*.=शरीरास्थि.

Skull.– कपाल, कर्पर *m*. (*अस्थि *n*. bone.)

अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ २०५॥ अ
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः।

Limb, a member.– अङ्ग *n*.; प्रतीक, अवयव, अपघन *m*.

The body.– कलेवर, गात्र, वपुस्, संहनन, शरीर,

वर्ष्मन् *n.*, विग्रह, काय *m.*; देह *m. n.*, मूर्ति, तनु, तनू *f.*

वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिणम् ॥ २०६ ॥

Left; left-hand side.– सव्य *adj.*=वामं शरीरम् ।

(वाम *adj.*=left.)

Right; right-hand side.–अपसव्य *adj.*=दक्षिणं शरीरम् ।

(दक्षिण *adj.*=right, on the right.)

सक्थि क्लीबे पुमानूरुः पदङ्घ्रिश्चरणोऽस्त्रियाम् ।

Thigh.– *सक्थि *n.*; ऊरु *m.*

Foot.– *पद *n.*; अङ्घ्रि *m.*; चरण *m. n.*; (पाद *m.*)

जङ्घाऽथ घुटिका जानु कटिः श्रोणिः स्त्रियां समे ॥२०७॥

Leg.– जङ्घा *f.*

Ankle.– घुटिका *f.*

Knee.– जानु *n.*

Hip, loins.– कटि, श्रोणि *f.*

पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः ।

The hinder part of the loins **of a** woman, hip, buttocks.– नितम्ब *m.*

The front part of the loins of a woman, hip, loins.–जघन *n.*

पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ ।

The belly.–पिचण्ड, कुक्षि *m.*;जठर,उदर, तुन्द *n.*

The female breasts.– स्तन, कुच *m.*

(also उरोज, पयोधर, वक्षोज &c. *m.*)

चुचुकं तु कुचाग्रं स्यान्न ना क्रोडं भुजान्तरम् ॥२०८॥

Nipple.– चुचुक, कुचाग्र *n.*

Chest.– क्रोड *n.* (or क्रोडा *f.*), भुजान्तर *n.*

उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः ।

बाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः ॥ २०९ ॥

The breast, bosom.– उरस्, वत्स, वक्षस् *n.*

Back.– पृष्ठ *n.*=तनोश्चरमम् ।

Arm-pit.– बाहुमूल *n.*; कक्ष *m.*

Sides.– पार्श्व *m. n.*=तयोः कक्षयोरधोभागः ।

स्कन्धोऽप्यंसोऽवलग्नं तु मध्योऽस्त्री मध्यमं तथा ।

Shoulder.– स्कन्ध *m.*; अंस *m.* & *n.*

Waist.– अवलग्न *n.*; मध्य *m.* & *n.* मध्यम *n.*

दोर्दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथा ॥२१०॥

Arm.– *दोस, *दोषन्, भुज, बाहु *m.*

Hand.– पाणि, हस्त, कर *m.*

कूर्परोऽथ प्रकोष्ठोऽथ मणिबन्धोऽथ चाङ्गुली ।

Elbow.– कूर्पर *m.*

Fore-arm.–प्रकोष्ठ *m.*

Wrist.– मणिबन्ध *m.*

Finger, (toe also).– अङ्गुली *f.*

अङ्गुष्ठस्तर्जनीत्याद्यास्ता नखो नखरोऽस्त्रियाम् ॥२११॥

Thumb.– अङ्गुष्ठ *m.*

Index finger or fore-finger.– तर्जनी *f.*

(मध्यमा *f.* middle finger. अनामिका *f.* the ring-finger. कनिष्ठिका *f.* the little finger.)

Nail.– नख, नखर *m.* & *n.*

वितस्तिः स्त्री चपेटो ना मुष्टिः स्त्री चाञ्जलिः पुमान् ।

Span.– वितस्ति *f.*

Open hand or palm, with fingers extended.– चपेट *m.*

Fist.– मुष्टि *f.*

Hands joined (so as to form cavity.) –अञ्जलि *m.*

कण्ठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि ॥२१२॥

Throat.– कण्ठ, गल *m.*

Neck.– ग्रीवा, शिरोधि, कंधरा *n.*

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।

The mouth; face.– वक्त्र, आस्य, वदन, तुण्ड, आनन, लपन, मुख *n*.

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥२१३॥

Nose.– घ्राण *n*.; गन्धवहा, घोणा, नासा, नासिका *f*.

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।

Lip.– ओष्ठ, अधर, रदनच्छद *m*.; दशनवासस् *n*.

अधस्ताच्चिबुकं गण्डौ कपोलौ तत्परो हनुः ॥ २१४ ॥

Chin.– चिबुक *n*.

Cheek.– गण्ड, कपोल *m*.

Jaw.– हनु *m*.

रदना दशना दन्ता रदास्तालु तु काकुदम् ।

Tooth.–रदन, दशन, दन्त, रद *m*.

Palate.– तालु, काकुद *n*.

रसज्ञा रसना जिह्वा प्रान्तावोष्ठस्य सृक्किणी ॥ २१५ ॥

Tongue.–रसज्ञा, रसना, जिह्वा *f*.

The corner of the mouth.– सृक्कि or सृक्किन *n*.; (सृक्किणी *f*.)

ललाटभालेऽथ भ्रूः स्त्री तारकाऽक्ष्णः कनीनिका ।

Forehead.– ललाट, भाल *n*.

Eye-brow.– *भ्रू *f*.

Pupil of the eye.– तारका, कनीनिका *f.*

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ॥ २१६ ॥

दृग्दृष्टी चास्तु नेत्राम्बु रोदनं चास्त्रमश्रु च ।

The eye, sight.– लोचन, नयन, नेत्र, ईक्षण, चक्षुस्, *अक्षि *n.*; दृश्, दृष्टि *f.*

Tear.– अस्रु, नेत्राम्बु, रोदन, अस्र, अश्रु *n.*

(लोच् 1 A. to see; आलोच्, समालोच् *Cau.* to consider, to regard.)

(चक्ष् 2 A. to see, to perceive, to name; with आ to tell, to declare, to address; with प्रति & आ to repulse; with वि to explain.)

अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने ॥ २१७ ॥

Corner of the eye.– अपाङ्ग *m.*=नेत्रयोरन्तः.

A side-long look.– कटाक्ष *m* =अपाङ्गदर्शनम्.

कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ।

Ear.– कर्ण, शब्दग्रह *m.*; श्रोत्र *n.*; श्रुति *f.*; श्रवण, श्रवस् *n.*

(कर्ण् 10 P. A. to hear.)

उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ॥ २१८ ॥

Head.– उत्तमाङ्ग, शिरस्, शीर्ष *n.*; मूर्धन् *m.*; मस्तक *m.* & *n.*

(उत्तम+अङ्ग=कर्म०, syn. वराङ्ग.)

चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ।

Hair.– चिकुर, कुन्तल, बाल, कच, केश, शिरोरुह *m.*

शिखण्डकः काकपक्षोऽथालकाश्चूर्णकुन्तलाः ॥ २१९ ॥

Side-lock of hair.– शिखण्डक, काकपक्ष *m.*

Curled hair.– अलक, चूर्णकुन्तल *m.*

कबरी केशवेशोऽथ धम्मिल्लः संयताः कचाः ।

Braid of hair.– कबरी *f.*; केशवेश *m.*

Braided and ornamented hair.–धम्मिल्ल *m.* =संयताः कचाः ।

शिखा चूडा केशपाशी व्रतिनस्तु सटा जटा ॥ २२० ॥

Crest of hair on the crown of the head.– शिखा, चूडा, केशपाशी *f.*

Matted hair.– सटा, जटा *f.*=व्रतिनः शिखा.

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ।

After words meaning hair, these words mean much or flowing hair.– पाश, पक्ष, हस्त, कलाप *m.*

तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे ॥ २२१ ॥

Hair on the body.– तनूरुह, रोमन्, लोमन् *n.*

Beard.– श्मश्रु *n.*

आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ।

Dress, decoration.– आकल्प, वेष (or वेश) *m.*; नेपथ्य, प्रतिकर्मन्, प्रसाधनम् *n.*

(साध् 5 P. to finish, to accomplish; *Cau.* साधय् to go, to set out, to obtain; प्रसाधय *Caus.* to dress, to adorn.)

प्रसाधितो मण्डितश्च भूषितश्च परिष्कृतः ॥ २२२ ॥

Adorned, decorated, decked.– प्रसाधित, मण्डित, भूषित, परिष्कृत *adj.*

विभ्राड् भ्राजिष्णुरोचिष्णू भूषणं स्यादलंक्रिया ।

Elegant, splendid, radiant in ornament or vesture.– विभ्राज्, भ्राजिष्णु, रोचिष्णु *adj.*

The act of adorning.– भूषण *n.*; अलंक्रिया *f.*

अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ २२३ ॥
मण्डनं चाथ मुकुटं किरीटं पुन्नपुंसकम् ।

An ornament.– अलंकार *m.*; आभरण *n.*; परिष्कार *m.*; विभूषण, मण्डन *n.*

Crown.– मुकुट *n.*; किरीट *m.* & *n.*

चूडामणिः शिरोरत्नं तरलो हारमध्यगः ॥ २२४ ॥

Crest-jewel.– चूडामणि *m.*=शिरोरत्न *n.*

The central gem of a necklace.– तरल *m*. =हारमध्यगो मणिः ।

कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनम् ।

An ornament of the ear, worn by women.– कर्णिका *f*.; तालपत्र *n*.

An ear-ring.– कुण्डल, कर्णवेष्टन *n*.

मुक्तावली तु हारः स्यात् कटको वलयोऽस्त्रियाम् ।

A garland of pearls.– मुक्तावली *f*.; हार *m*.

Bracelet, bangles, i. e., ornaments of the wrist.– कटक *m*.; वलय *m*. & *n*.

केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिका ॥ २२५ ॥

Bracelet on the arm.– केयूर, अङ्गद *n*.

Ring.– अङ्गुलीयक *n*.; ऊर्मिका *f*.

स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ।

The girdle round the waist, zone.– मेखला, काञ्ची, सप्तकी, रशना *f*.

मञ्जीरो नूपुरोऽस्त्री तु किङ्किणी क्षुद्रघण्टिका ॥ २२६ ॥

Ornament for the feet or toes.– मञ्जीर *m*.; नूपुर *m*. & *n*.

A small bell.– किङ्किणी, क्षुद्रघण्टिका *f*.

वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ।

कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम् ॥ २२७ ॥

Cloth (made of the bark of trees).- वाल्क *adj*. (e. g. क्षौम=linen).

Cloth (made of fibres derived from fruits).-फाल *adj*.

Cotton-made.- कार्पास, बादर *adj*.

Silken (derived from insects).- कौशेय *adj*.=कृमिकोशोत्थम् ।

Woollen.- राङ्कव *adj*.=मृगरोमजम्.

तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ।

A pair of washed garments.- उद्गमनीय *n*. =धौतवस्त्रयुगम् ।

क्षौमं दुकूलं स्याद् द्वे तु निवीतं प्रावृतं त्रिषु ॥२२८॥

A very fine cloth or raiment of silk.- क्षौम, दुकूल *n*.

Any thing worn on the body, as a veil, cloak, mantle.- निवीत, प्रावृत *adj*.

दैर्घ्यमायाम आरोहः परिणाहो विशालता ।

Length of a cloth.- दैर्घ्य *n*.; आयाम,आरोह *m*.

Width, breadth.- परिणाह *m*.; विशालता *f*.

पटोऽस्त्री वसनं वासश्चैलवस्त्राम्बरांशुकम् ॥ २२९ ॥

Cloth, clothing, garment.- पट *m.* & *n.*; वसन, वासस्, चैल, वस्त्र, अम्बर, अंशुक *n.*

(वस् 2 A. to put on clothes, to dress.)

चोलः कूर्पासकोऽस्त्री स्यात् समौ रल्लकम्कबलौ ।

A bodice.- चोल *m.*; कूर्पासक *m.* & *n.*

A woollen blanket.- रल्लक, कम्बल *m.*

पटच्चरं जीर्णवस्त्रं समौ नक्तककर्पटौ ॥ २२९ ॥ अ

Worn out garment, rag.-पटच्चर,जीर्णवस्त्र *n.*; नक्तक, कर्पट *m.*

अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि ।

Canopy.- वितान *m.* & *n.*; उल्लोच *m.*

A tent.- दूष्य *n.*=वस्त्रवेश्मन् *n.*

प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ २३० ॥

Curtain.- प्रतिसीरा, जवनिका, तिरस्करिणी *f.*

उत्तरीयं प्रावरणं स्यान्मार्ष्टिर्मार्जना मृजा ।

An upper or outer garment.- उत्तरीय, प्रावरण *n.*

Cleaning (the body.)- मार्ष्टि, मार्जना, मृजा *f.*

(मृज् 2 P. to wipe away, to rub, to clean or cleanse, to sweep, to sprinkle; with अप to remove; with अव to wash, to moisten;

with परि to touch; with प्र to rub, to polish, to brighten.)

अवगाहाप्लवौ स्नानेऽप्यथ चर्चानुलेपनम् ॥२३०॥ (अ)

Bath, bathing.– अवगाह, आप्लव *m.*; स्नान *n.*

Smearing the body with fragrant unguents.– चर्चा *f.*, अनुलेपन *n.*

(गाह् 1 A. to dive into, to enter; with अव to bathe; to betake oneself to.)

(स्ना 2 P. to bathe; निष्णा to be perfect, to be skilful or conversant.)

उद्वर्तनोत्सादने द्वे परिकर्माङ्गसंस्क्रिया ।

Rubbing the body with fragrant unguents.– उद्वर्तन, उत्सादन *n.*

Personal decoration, dressing, painting or perfuming the body.– परिकर्मन् *n.*; अङ्गसंस्कार *m.* or अङ्गसंस्क्रिया *f.*

चन्दनोऽस्त्री मलयजो लाक्षाऽलक्तस्तथा जतु ॥ २३१

The sandal tree or ointment.–चन्दन *m.* & *n.*, मलयज *m.*

Lac-die.– लाक्षा *f.*; अलक्त *m.*, जतु *n.*

मृगनाभिर्मृगमदः कस्तूरी चाथ कुङ्कुमम् ।

Musk.– मृगनाभि, मृगमद *m.*; कस्तूरी *f.*

Saffron.– कुङ्कुम *n.*

घनसारस्तु कर्पूरः क्षोदो ना चूर्णमस्त्रियाम् ।

Camphor.– घनसार, कर्पूर *m.*

Powder.– क्षोद *m.*; चूर्ण *m.* & *n.*

(क्षुद् 7 P. A. to pound; with अव to grind. चूर्ण् 10 P. to grind, to crush.)

वासितं त्रिषु वर्तिस्तु वर्णकं च विलेपनम् ॥ २३२ ॥

Perfumed, fragrant.– वासित *adj.*

Perfumes applied to the body.– वर्ति *f.*; वर्णक, विलेपन *n.*

(लिप् 6 P. A., विलिप् to anoint, to besmear, to be polluted; अवलिप् to be proud, to be arrogant.

संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ।

Perfuming by means of flowers, &c.– अधिवासन *n.*=गन्धमाल्याद्यैर्यः संस्कारः सः.

(वास् 10 P. to perfume; अधिवास् to adorn.)

माल्यं मालास्रजौ मूर्ध्नि शिखास्वापीडशेखरौ ॥ २२३

A garland in general or wreath worn on the head.– माल्य *n.*; माला, स्रज् *f.*

Crest.– आपीड, शेखर *m*.

उपधानं तूपबर्हः शय्यायां शयनीयवत्।

शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः ॥ २३४ ॥

Pillow, cushion.– उपधान *n*.; उपबर्ह *m*.

Bed, bedding.– शय्या *f*.; शयनीय, शयन *n*.

Couch, cot.– मञ्च, पर्यङ्क, पल्यङ्क *m*.; खट्वा *f*.

गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम्।

Ball.– गेन्दुक, कन्दुक *m*.

Lamp.– दीप, प्रदीप *m*.

Seat, stand.– पीठ, आसन *n*.

दर्पणे मुकुरादर्शौ व्यजनं तालवृन्तकम् ॥ २३५ ॥

Mirror, looking-glass.– दर्पण, मुकुर, आदर्श *m*.

A fan.– व्यजन, तालवृन्तक *n*.

प्रसाधनी कङ्कतिकाभोगस्तु परिपूर्णता।

Comb.– प्रसाधनी, कङ्कतिका *f*.

Completion, fulness.–आभोग *m*.; परिपूर्णता *f*.

छत्रं तु स्यादातपत्रं संपुटस्तु समुद्गकः।

An umbrella.– छत्र, आतपत्र *n*.

A small covered box.– संपुट, समुद्गक *m*.

इति मनुष्यवर्गः।

संततिर्गोत्रजननकुलान्यभिजनान्वयौ ॥ २३६ ॥
वंशोऽन्ववायः संतानो वर्णाः स्युर्ब्राह्मणादयः ।

Family, race, lineage.– संतति *f.*; गोत्र, जनन, कुल *n.*; अभिजन, अन्वय, वंश, अन्ववाय, संतान *m.*

Caste.– वर्ण *m.*=ब्राह्मणादयः।

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ॥ २३७ ॥

Noble, high-born.–महाकुल, कुलीन, आर्य, सभ्य, सज्जन, साधु *adj.*

ब्राह्मणे द्विजविप्राग्रजन्मभूदेववाडवाः ।

A Brahmin.– ब्राह्मण, द्विज, विप्र; अग्रजन्मन्, भूदेव, वाडव *m.*

विद्वान्विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः॥२३८॥
धीरो मनीषी ज्ञः प्राज्ञो विदग्धः पण्डितः कविः ।
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः॥२३९॥
दूरदर्शी दीर्घदर्शी श्रोत्रियश्छान्दसौ समौ ।

A learned, educated, wise, prudent or intelligent man.– विद्वस्, विपश्चित, दोषज्ञ, सत, *सुधी, कोविद, बुध, धीर, मनीषिन्, ज्ञ, प्राज्ञ, विदग्ध, पण्डित, कवि, धीमत्, सूरि, कृतिन्, कृष्टि, लब्धवर्ण, विचक्षण, दूरदर्शिन्, दीर्घदर्शिन्, श्रोत्रिय, छान्दस *m.* & *adj.*

छात्रान्तेवासिनौ शिष्ये गुरुरध्यापकः समौ ।

Pupil, student.– छात्र, अन्तेवासिन्, शिष्य *m.*

Preceptor, teacher, master.– गुरु, अध्यापक *m.*

यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥२४०॥

Sacrifice.– यज्ञ, सव, अध्वर, याग, सप्ततन्तु, मख, क्रतु *m.*

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।

Reciting the Vedas.– पाठ *m.*

Daily oblations to gods.– होम *m.*

Hospitality to guests.– सपर्या (अतिथीनाम्).

Daily oblations to the Manes.– तर्पण *n.*

Daily offerings to demons.– बलि *m.*

(These are called the पञ्च महायज्ञाः.)

सदस्तु परिषद्गोष्ठीसभासमितिसंसदः ॥ २४१ ॥

Meeting, assembly, company.– सदस् *n.*; परिषद्, गोष्ठी, सभा, समिति, संसद् *f.*

सभासदः सभास्तारा: सभ्याः सामाजिकाश्च ते ।

One attending a meeting, member.– सभासद्, सभास्तार, सभ्य, सामाजिक *m.*

वेदिः परिष्कृता भूमिः समे स्थण्डिलचत्वरे ॥२४२॥

An altar.– वेदि *f.*=परिष्कृता भूमिः ।

The square piece of ground, used for sacrifice.- स्थण्डिल, चत्वर *n*.

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ।
आश्रमोऽस्त्री तथा पादग्रहणं त्वभिवादनम् ॥२४२॥ अ

A bachelor, a religious student.- ब्रह्मचारिन् *m*.

A house-holder.- गृहिन् (or गृहस्थ) *m*.

A hermit.- वानप्रस्थ *m*.

An ascetic.- भिक्षु (संन्यासिन्) *m*.

A religious order, or one of the principal stages of life or modes of passing life.-आश्रम *m*. *n*.

(आश्रम *m*. also means hermitage.)

A respectful salutation.- पादग्रहण, अभिवादन.

गायत्रीप्रमुखं छन्दो हव्यपाके चरुः पुमान् ।

A metre.- छन्दस् *n*.=गायत्र्यादि ।

Boiled rice for oblations.- हव्यपाक, चरु *m*.

दानादि क्रतुकर्मेष्टं पूर्तं खातादि कर्म यत् ॥२४३॥आ

Sacrificial presents.- इष्ट *n*.=दानादि क्रतुकर्म ।

Works of charity, such as digging wells, &c.– † पूर्त *n.*=खातादि कर्म ।

त्यागो निर्वपणं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २४३ ॥

Gift, donation, giving.– त्याग *m.*: निर्वपण, दान, उत्सर्जन, विसर्जन, विश्राणन, वितरण, स्पर्शन, प्रतिपादन *n.*

(वप् 1 P. A. to sow, to shave; निवप् to offer a sacrifice; निर्वप् to give presents, &c.)

मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकम् ।
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः ॥२४४॥

Whatever is done or given on a person's decease, obsequies, funeral.– और्ध्वदेहिक *n.* or *adj.*

Offerings to the Manes.– पितृदान *n.*; निवाप.

---

† पुष्करिण्यः सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् ॥

A large artificial tank.– पुष्करिणी *f.*

A temple.–देवतायतन *n.*=देवता+आयतन=ष० त०

The above given according to the rites prescribed by the *Sastras*.- श्राद्ध *n.*

याच्ञाऽर्थनाऽभिशस्तिश्चाऽन्वेषणा तु गवेषणा ।

Begging, asking.- याच्ञा, अर्थना, अभिशस्ति *f.*

Investigation of duty by reasoning, research in general.- अन्वेषणा, गवेषणा *f.*

आतिथ्यमातिथेयं च पाद्यं चार्घ्यं च ते त्रिषु ॥२४५॥

Hospitable or hospitality.- आतिथ्य *adj.* or *n.*

One who is hospitable or kind to guests- आतिथेय *adj.*

Water given to a guest for washing feet.- पाद्य *n.* or *adj.*

The materials of worship.- अर्घ्य *n.* or *adj.*

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते ।

One who comes as a guest (at the dinner time) - आवेशिक, आगन्तु *adj.*; अतिथि *m.*; गृहागत *adj.*

प्राघूर्णिकः प्राघुणकश्चाभ्युत्थानं तु गौरवम् ॥ २४६ ॥

A guest.-प्राघूर्णिक, प्राघुणक *m.*

Respect shown to a guest.-- अभ्युत्थान, गौरव *n*.

पूजा नमस्याऽपचितिः सपर्यार्चार्हणाः समाः ।

Worship, reverence.- पूजा, नमस्या, अपचिति, सपर्या, अर्चा, अर्हणा *f*.

वरिवस्या तु शुश्रूषा परिचर्याऽप्युपासना ॥ २४७ ॥

Service, propitiation.- वरिवस्या, शुश्रूषा, परिचर्या, उपासना *f*.

[शुश्रूष् A. (desider. of श्रु to hear) to obey, to attend dutifully upon, to serve.]

उपस्पर्शस्त्वाचमनमथ मौनमभाषणम् ।

Rinsing the mouth.- उपस्पर्श *m*.; आचमन *n*.

Silence, taciturnity.- मौन, अभाषण *n*.

(आचम् 1 P. to sip water.)

आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः ॥ २४८ ॥

पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ।

Order, method, custom.- आनुपूर्वी *f*. or आनुपूर्व्य *n*.; आवृत, परिपाटी *f*.; अनुक्रम, पर्याय *m*.

Violation of the order.- अतिपात, पर्यय, उपात्यय *m*.

व्रज्या तु स्यात्पर्यटनं नियमस्तु व्रतं तथा ॥ २४९ ॥

Travelling.– व्रज्या *f.*; पर्यटन *n.*

A **vow**, **penance**.– नियम *m.*; व्रत *n.*

(व्रज् 1 P. to go, to undergo, to proceed, to obtain; अनुव्रज to follow, to pursue; परिव्रज to wander about as a mendicant; प्रव्रज् to travel.)

औपवस्तं तूपवासो विवेकः पृथगात्मता ।

A **fast**, **fasting**.– औपवस्त *n.*; उपवास *m.*

Difference, **distinction**.– विवेक *m.*; पृथगात्मता *f.*

विधिः कल्पः क्रमश्चाथ वर्णिनो ब्रह्मचारिणः ॥२५०॥

A **sacred precept**, **act**, or **rite prescribed by religion**.– विधि, कल्प, क्रम *m.*

A **religoius student**, an **unmarried man**.– वर्णिन्, ब्रह्मचारिन् *m.*

तपस्वितापसौ भिक्षुपरिव्राजौ यतिर्यती ।

A **devout man**, an **ascetic**, **hermit**.– तपस्विन्, तापस *m.*

A **mendicant**.– भिक्षु, परिव्राज् *m.*

A **man having perfect self-control**, an **ascetic**.– यति or यतिन् *m.*

पवित्रः प्रयतः पूतः पाखण्डाः सर्वलिङ्गिनः ॥२५१॥

Holy, pious, sacred.– पवित्र, प्रयत, पूत *adj.*

A heretic.– पाखण्ड, सर्वलिङ्गिन् *m.*

पालाशो दण्ड आषाढः कुण्डी स्त्वस्त्री कमण्डलुः ।

A staff of the wood of *palas'a* tree. carried by an ascetic.– आषाढ *m.*=पालाशो दण्डः ।

The ascetic's water-pot.– कुण्डी *f.*; कमण्डलु *m. n.*

अजिनं चर्म कृत्तिः स्त्री स्वाध्यायस्तु जपो भवेत् ।

Skin of deer.– अजिन, चर्मन् *n.*; कृत्ति *f.*

Reciting inaudibly or muttering prayers.– स्वाध्याय, जप *m.*

(जप् 1 P. to mutter, to speak in a low voice; with उप to bring over to one's party, to whisper to.)

उपवीतं ब्रह्मसूत्रं क्षौरं वपनमुण्डने ॥ २५२ ॥

The sacred thread of a Brahmin.– उपवीत, ब्रह्मसूत्र *n.*

Shaving.– क्षौर, वपन, मुण्डन *n.*

वाचंयमो मुनिः पुंसि विवाहोपयमौ समौ ।

तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ २५३ ॥

A sage who has made the vow of not speaking.– वाचंयम, मुनि *m.*

Marriage.– विवाह, उपयम, परिणय, उद्वाह, उपयाम *m.*; पाणिपीडन *n.*

(वह 1 P. A. to carry, to bear, to feel; वह् & प्रवह् to flow, to blow; आवह् to produce effect, to tend to, to bring on; उद्वह् to lift up; to marry; निर्वह् *Cau.* to support, to fulfil; विवह् to marry; संवह् *Cau.* to rub gently, to champoo.)

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

Sensual intercourse.– व्यवाय, ग्राम्यधर्म *m.*; मैथुन, निधुवन, रत *n.*

त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः ॥

The pursuit of the three principal ends of life, viz. duty or religion, love, and money.– त्रिवर्ग *m.* =धर्मकामार्थाः. (धर्म *m. n.*, काम *m.*, अर्थ *m.*)

The pursuit of the four ends of life, viz. the three mentioned above and final

beatitude.-चतुर्वर्ग *m.*=धर्मार्थकाममोक्षाः.(मोक्ष *m.*)

इति ब्रह्मवर्गः ।

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्॥२५४॥

The warrior caste.- मूर्धाभिषिक्त, राजन्य, बाहुज, क्षत्रिय, विराज् *m.*

(सिच् 6 P. A. (सिञ्च्) to sprinkle, to discharge; with अभि to sprinkle with water; to inaugurate with sacred water; with उत् to make haughty, to make proud.)

(राज् 1 P. A. to shine; to govern.)

राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः ।

A king, a prince.- राजन्, राज्, पार्थिव, क्ष्माभृत्, नृप, भूप, महीक्षित *m.*

(क्ष्मां बिभर्ति इति क्ष्माभृत् =उ० त०. नॄन् भुवं च पालयति = नृपः, भूपः उ० त०. महीं क्षियति महीक्षित =उ० त०, syn. भूभृत्, महीभृत्, महीभुज्, नरपति, मनुजाधिप, भूपति, भूपाल, महीपाल, इ०).

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥

A king paramount over all the neighbouring princes.- अधीश्वर *m.*=प्रणताशेषसामन्तः ।

(सामन्त *m*. = a neighbouring prince.)

चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ॥ २५५ ॥

An emperor, sovereign.– चक्रवर्तिन्, सार्वभौम *m*.

A tributary prince, a chief.– मण्डलेश्वर *m*.= सार्वभौमादन्यो नृपः ।

मन्त्री धीसचिवोऽमात्यः पुरोधास्तु पुरोहितः ।

A minister, councillor.– मन्त्रिन्, धीसचिव, अमात्य *m*.

The family priest, preceptor.– पुरोधस्, पुरोहित *m*.

प्रतीहारो द्वारपालोथाध्यक्षाधिकृतौ समौ ॥ २५६ ॥

Door-keeper.– प्रतीहार, द्वारपाल *m*.

Officer.– अध्यक्ष, अधिकृत *m*.

रक्षिवर्गस्त्वनीकस्थः षण्ढवर्षवरौ समौ ।

The royal body-guard.– रक्षिवर्ग, अनीकस्थ *m*.

(रक्षिन् *m*. a protector, defender.)

Eunuch.– षण्ढ, वर्षवर *m*.

स्थापत्याः स्युः कञ्चुकिनः सेवकार्थ्यनुजीविनः ।

A chamberlain.– स्थापत्य, कञ्चुकिन् *m*.

Servant, dependant.– सेवक, अर्थिन्, अनुजीविन् *m.*

(सेव् 1 A. to follow, to enjoy, to serve, to gratify; निषेव् to observe.)

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ २५७ ॥

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ २५८ ॥

An enemy, one who hates, opposes or resists, a hostile party.– रिपु, वैरिन्, सपत्न, अरि, द्विषत, द्वेषण, दुर्हृद, द्विष, विपक्ष, अहित, अमित्र, दस्यु, शात्रव, शत्रु, अभिघातिन्, पर, अराति, प्रत्यर्थिन्, परिपन्थिन् *m.*

स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृद् ।

Friend, companion.– स्निग्ध, वयस्य, सवयम् *m.* or *adj.*

Friend, ally.– मित्र *n.*; *सखि *m.*, सुहृद *m.*

सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ।

Friendship.– सख्य, साप्तपदीन *n.*

Obligingness, serving, deference.– अनुरोध *m.*; अनुवर्तन *n.*

(रुध् 7 P. A. to obstruct, to stop, to con-

fine, to arrest; अनुरुध् to approve, to obey, to love; अवरुध् to restrain, to besiege.)

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ॥ २५९ ॥
चारश्च गूढपुरुषश्चाप्तप्रत्ययितौ समौ ।

A spy, detective.– यथार्हवर्ण, प्रणिधि, अपसर्प, चर, स्पश, चार, गूढपुरुष *m.*

Confidential, trusty (person).– आप्त, प्रत्ययित *adj.*

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ॥ २६० ॥

An astrologer **or** astronomer.– सांवत्सर, ज्यौतिषिक, दैवज्ञ, गणक *m.*

लेखकः स्याल्लिपिकरो लिखितं तु लिपिर्लिबिः ।

A copyist; writer.– लेखक, लिपिकर *m.*

A writing in general, written characters.– लिखित *n.*; लिपि, लिबि *f.*

(लिख् 1 P. to write, to touch, to scratch, to carve; अभिलिख to paint; आलिख to delineate; उल्लिख् to polish, to rub.)

स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी ॥ २६१ ॥

A messenger, envoy.–संदेशहर *m.*; दूत *m.*

Profession of an envoy.– दूत्य *n.*=दूतभावः ।

Servant, dependant.– सेवक, अर्थिन्, अनुजीविन् *m*.

(सेव् 1 A. to follow, to enjoy, to serve, to gratify; निषेव् to observe.)

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ २५७ ॥

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ २५८ ॥

An enemy, one who hates, opposes or resists, a hostile party.– रिपु, वैरिन्, सपत्न, अरि, द्विषत्, द्वेषण, दुर्हृद्, द्विष्, विपक्ष, अहित, अमित्र, दस्यु, शात्रव, शत्रु, अभिघातिन्, पर, अराति, प्रत्यर्थिन्, परिपन्थिन् *m*.

स्निग्धो वयस्यः सवया अथ मित्रं सखासुहृद् ।

Friend, companion.– स्निग्ध, वयस्य, सवयस् *m*. or *adj*.

Friend, ally.– मित्र *n*.; *सखि *m*., सुहृद् *m*.

सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ।

Friendship.– सख्य, साप्तपदीन *n*.

Obligingness, serving, deference.– अनुरोध *m*.; अनुवर्तन *n*.

(रुध् 7 P. A. to obstruct, to stop, to con-

fine, to arrest; अनुरुध् to approve, to obey, to love; अवरुध् to restrain, to besiege.)

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ॥ २५९ ॥
चारश्च गूढपुरुषश्चाप्तप्रत्ययितौ समौ ।

A spy, detective.– यथार्हवर्ण, प्रणिधि, अपसर्प, चर, स्पश, चार, गूढपुरुष *m*.

Confidential, trusty (person).– आप्त, प्रत्ययित *adj*.

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ॥ २६० ॥

An astrologer or astronomer.– सांवत्सर, ज्यौतिषिक, दैवज्ञ, गणक *m*.

लेखकः स्याल्लिपिकरो लिखितं तु लिपिर्लिबिः ।

A copyist; writer.– लेखक, लिपिकर *m*.

A writing in general, written characters.– लिखित *n*.; लिपि, लिबि *f*.

(लिख 1 P. to write, to touch, to scratch, to carve; अभिलिख to paint; आलिख to delineate; उल्लिख् to polish, to rub.)

स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणी ॥ २६१ ॥

A messenger, envoy.–संदेशहर *m*.; दूत *m*.

Profession of an envoy.– दूत्य *n*.=दूतभावः ।

Message or embassy.–दूत्य *n*.=दूतकर्म ।

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।

A traveller.– अध्वनीन, अध्वग, अध्वन्य, पान्थ, पथिक *m*.

संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ॥ २६२ ॥

Peace, alliance; or the policy of peace.– संधि *m*.

War, battle; or the policy of war.– विग्रह *m*.

Marching against, invading.– यान *n*.

Maintaining a post against an enemy.– आसन *n*.

Duplicity.– द्वैध *n*.

Seeking protection or help from other kings.– आश्रय *m*.

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ।

राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥२६२ अ

A requisite of regal administration, (of which seven are enumerated.)–प्रकृति *f*., राज्याङ्ग *n*.

1 King, 2 minister, 3 an ally, 4 treasure,

5 territory, 6 fortresses, & 7 army, to which are sometimes added companies of citizens, making an 8th class.

(राज्य *n*. kingdom, administration.)

साहसं तु दमो दण्डः साम सान्त्वमथो समौ ।
भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम् ॥ २६३ ॥

Policy of kings.– उपाय *m*.

Subduing.– साहस *n*.; दम *m*.; दण्ड *m*.

Conciliation.– सामन्, सान्त्व *n*.

Disunion, sowing dissensions among confiderates.– भेद, उपजाप *m*.

Test or trial of honesty by religious or other inducements.– उपधा *f*.=धर्मा०.

(दण्ड् 10 P. to chastise, to punish. सान्त्व् 10 P. to comfort, to console, to soothe.)

विविक्तविजनच्छन्ननिःशलाकास्तथा रहः ।

Privacy, lonely, secluded, concealed.– विविक्त, विजन, छन्न, निःशलाक *adj*.; रहस् *n*.

(विच् 7 & 3 P. A. to separate; विविच् to discriminate, to be solitary.)

रहश्चोपांशु चालिङ्गे रहस्यं तद्भवे त्रिषु ॥ २६४ ॥

Privately, secretly.– रहस्, उपांशु *adv.*
What is done in privacy.– रहस्य *adj. & n.*

समौ विश्रम्भविश्वासौ भ्रेषो भ्रंशो यथोचितात् ।
Confidence, trust.– विश्रम्भ, विश्वास *m.*
Falling from rectitude, betraying.– भ्रेष *m.*=यथोचिताद् भ्रंशः ।

(स्रम्भ् or श्रम्भ 1 A. to be careless, to have faith in; with वि to trust, to confide in.)

(श्वस् 2 P. to breathe, to sigh; आश्वस to recover, to revive, to take courage, to take heart; विश्वस् to rely upon, to confide in; निश्वस् to sigh; उच्छ्वस् to exhale, to breathe; to expand or open as a flower, to sigh.)

न्यायस्तु कल्पो न्याय्यं तु युक्तमौपयिकं त्रिषु ॥
Justice, law, rule.– न्याय, कल्प *m.*
Right, just.– न्याय्य, युक्त, औपयिक *adj.*

अववादस्तु निर्देशो निदेशः शासनं च सः ॥ २६५ ॥
शिष्टिश्चाज्ञा च संस्था तु मर्यादा धारणा स्थितिः ।
Command, order.– अववाद, निर्देश, निदेश *m.*; शासन *n.*; शिष्टि, आज्ञा *f.*

Continuance in the right path, rectitude.– संस्था, मर्यादा, धारणा, स्थिति *f.*

[शास् 2 P. to govern, to teach, to punish; (A.) to pray; अनुशास् to teach, to instruct, to regulate; आशास् (A.) to wish, to hope; प्रशास् to command.]

आगोऽपराधो मन्तुश्च भागधेयः करो बलिः॥ २६६ ॥

A crime, fault.– आगस *n.*; अपराध, मन्तु *m.*
Rents, tax, tribute.– भागधेय, कर, बलि *m.*

घट्टादि देयं शुल्कोऽस्त्री प्राभृतं तु प्रदेशनम्।
उपायनमुपग्राह्यमुपहारस्तथोपदा ॥ २६७ ॥

Toll.– शुल्क *m.* & *n.*

Present, ransom, victim of an offering to a deity.– प्राभृत, प्रदेशन, उपायन, उपग्राह्य *n.*; उपहार *m.*; उपदा *f.*

सान्दृष्टिकं फलं सद्य उदर्कः फलमुत्तरम्।

Immediate gain or result.– सान्दृष्टिक *n.* = सद्यः फलम्।

Future result or gain.– उदर्क *m.*=उत्तरं फलम्।

प्रक्रिया त्वधिकारः स्याच्चामरं तु प्रकीर्णकम्॥

Bearing of the royal ensigns, authority. -प्रक्रिया *f.*; अधिकार *m.*

The *Chowrie* of the kings.- चामर, प्रकीर्णक *n.*

निवेशः शिबिरं क्लीबे सज्जनं तूपरक्षणम् ॥ २६८ ॥

Camp.- निवेश *m.*; शिबिर *n.*

Watch, guard.- सज्जन, उपरक्षण *n.*

[विश् 6 P. to enter, to pierce, to set down; आविश् to approach; आविष्ट=overpowered, affected with, possessed (by a demon); उपविश् to sit down, to encamp; अभिनिविश् (A.) to be endowed with; प्रतिनिविश् (A.) to be obstinate; निर्विश् to enjoy; प्रविश् to enter.]

मतंगजो गजो नागः कुञ्जरो वारणः करी ।
दन्ती स्तम्बेरमो हस्ती द्विरदेभद्विपास्तथा ॥ २६९ ॥

An elephant.- मतंगज, गज, नाग, कुञ्जर, वारण, करिन्, दन्तिन्, स्तम्बेरम, हस्तिन्, द्विरद, इभ, द्विप *m.*

गजशावस्तु कलभः करिणी धेनुका वशा ।

A young elephant.- गजशाव, कलभ *m.*

A she-elephant.- करिणी, धेनुका, वशा *f.*

गण्डः कटो मदो दानं कुम्भौ शिरसि हस्तिनः ॥२७०॥

Cheeks of an elephant.- गण्ड, कट *m.*

Rut of an elephant.- मद *m.*, दान *n.*

The temple of an elephant.- कुम्भ *m.*

तोत्त्रे वेणुकमालानं बन्धस्तम्भेऽथ शृङ्खले । [॥२७१
अन्दुको निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः स्त्रियाम्

A pike for driving an elephant or cattle.- तोत्त्र, वेणुक *n.*

The post to which it is tied.- आलान *n.*= बन्धस्तम्भः ।

Chains or fetters.-शृङ्खल *n.*& *f.*; अन्दुक *m.*; निगड *m.* & *n.*

The goad of an elephant.-अङ्कुश *m.* & *n.*, सृणि *f.*

[तुद् 6 P. A. to strike, to sting; with आ to push on.] (प्रतोद *m.* reins, a goad.)

दूष्या कक्ष्या वरत्रा स्यात् कल्पना सज्जना समे ।

The ropes by which an elephant is tied.- दूष्या, कक्ष्या, वरत्रा *f.*

Equipping or decorating (an elephant). - कल्पना, सज्जना *f.*

वाजिवाहार्वतुरगहयसैन्धवसप्तयः ॥ २७२ ॥
अश्वे किशोरो बालोश्वो वाम्यश्वा वडवा समाः ।

A horse.– वाजिन्, वाह, *अर्वन्, तुरग, हय, सैन्धव, सप्ति, अश्व *m*.

A colt.– किशोर *m*.=बालोऽश्वः ।

A mare.– वामी, अश्वा, वडवा *f*.

[तुरं (त्वरितं) गच्छति इति तुरगः, syn. तुरंग, तुरंगम.]

प्रोथमस्त्री तु घोणाऽस्य हेषा ह्रेषा तु निस्वनः ॥ २७३ ॥

The nostrils of a horse.– प्रोथ *m*. & *n*.= अश्वस्य घोणा ।

Neighing.– हेषा, ह्रेषा *f*.=अश्वस्य शब्दः ।

[हेष् 1 A. to neigh as a horse]

(ह्रेष् 1 A. to neigh as a horse.)

कविका तु खलीनोऽस्त्री शफं क्लीबे खुरः पुमान् ।

Bridle, reins.– कविका *f*.; खलीन *m*. & *n*.

Hoofs.– शफ *n*.; खुर *m*.

पुच्छोऽस्त्री लूमलाङ्गूले वालहस्तश्च वालधिः॥२७४॥

Tail.– पुच्छ *m*. & *n*.; लूम, लाङ्गूल *n*.

Hairy part of the tail.– वालहस्त, वालधि *m*.

क्लीबेऽनः शकटोऽस्त्री स्याच्छताङ्गः स्यन्दनो रथः ।

A cart, carriage.– अनस् *n*.; शकट *m*. & *n*.

A cart, chariot.– शताङ्ग, स्यन्दन, रथ *m*.

शिबिका याप्ययानं स्याद्दोलाप्रेङ्खादिका स्त्रियाम् ॥२७५

A palanquin.– शिबिका *f*., याप्ययान *n*.

A litter, swinging.– दोला, प्रेङ्खा *f*.

[दोलाय् A. (*denom. v.* from दोला) to swing, to fluctuate, to be unsteady.]

[या 2 P. to go; अनुया to follow; अभिया to approach; आया to come; समाया to meet with; उद्या to rise; प्रत्युद्या to go to meet (a guest), to welcome; प्रया to march; निर्या to go out.]

चक्रं रथाङ्गं नेमिः स्त्री प्रधिः पुंस्यथ धूः स्त्रियाम् ।

Wheel.– चक्र, रथाङ्ग *n*.

Tire.– नेमि *f*.; प्रधि *m*.

Yoke.– धुर् *f*.

पत्रं तु वाहनं यानं प्रासङ्गो ना युगाद्युगः ॥

A vehicle, a carriage.– पत्र, वाहन, यान *n*.

A yoke.– प्रासङ्ग, युगाद्युग *m*.

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ॥ २७६ ॥

An elephant-driver.– आधोरण, हस्तिपक, हस्त्यारोह, निषादिन् *m*.

सूतो यन्ता सारथिः स्यादश्वारोहास्तु सादिनः ।

A charioteer.– सूत, यन्तृ, सारथि *m.*

A horseman.– अश्वारोह, सादिन् *m.*

रथिनः स्यन्दनारोहाः सेनानीर्वाहिनीपतिः ॥ २७७ ॥

A warrior fighting in a chariot.– रथिन्, स्यन्दनारोह *m.*

Commander, general.– सेनानी, वाहिनीपति *m.*

भटा योधाश्च योद्धारः सैन्याः स्युः सैनिका हि ये ।

A warrior.– भट, योध, योद्धृ *m.*

A soldier, sepoy.– सैन्य, सैनिक *m.*

शीर्षण्यं तु शिरस्त्रे स्याद्वारबाणस्तु कञ्चुकः ॥ २७८ ॥

A helmet.– शीर्षण्य, शिरस्त्र *n.*

Breast-plate.– वारबाण, कञ्चुक *m.*

कवचो स्त्री कङ्कटकस्तनुत्रं वर्म दंशनम् ।

Armour.– कवच *m. n.*; कङ्कटक *m.*; तनुत्र, वर्मन्, दंशन *n.*

पिनद्धामुक्तसंनद्धसज्जवर्मितदंशिताः ॥ २७९ ॥

Armed. equipped.– पिनद्ध, आमुक्त, संनद्ध, सज्ज, वर्मित, दंशित *adj.*

[नह् 4 P. A. to bind, to tie; with अप to untie; with अपि or पि to tie; with उप to cause to be dressed (as a wound); with परि (परिणह्) to span, to surround, to grow large; with सम् to dress, to put on, to prepare for, to be ready.]

[मुच् 6 P. A. (मुञ्च्) to abandon, to loosen, to release; उन्मुच्, विमुच्, १० to liberate, to set free.]

पदातिपत्तिपदगाः पताकी वैजयन्तिकः ।

A foot-soldier.– पदाति, पत्ति, पदग *m.*

A flag-bearer.– पताकिन्, वैजयन्तिक *m.*

धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धरः॥२८०॥

Archer.– धन्विन्, धनुष्मत्, धानुष्क, निषङ्गिन्, अस्त्रिन्, धनुर्धर *m.*

पुरोगाग्रेसरप्रष्ठपुरोगमपुरःसराः ।

One who is, or fights, in the front of an army; chief; leader.– पुरोग, अग्रेसर, प्रष्ठ, पुरोगम, पुरःसर *adj.*

स्यात्सहायस्त्वनुचरो मन्दगामी तु मन्थरः ।

A follower.– सहाय, अनुचर *adj.*

Slow, lazy.– मन्दगामिन्, मन्थर *adj.*

जङ्घालस्त्वरितो वेगी तरस्वी जवनो जवः ॥ २८१ ॥

Swift, quick, fleet-– जङ्घाल, त्वरित, वेगिन्, तरस्विन्, जवन, जव *adj.*

[त्वर् 1 A. to make haste.]

शूरा वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वरः ।

Brave, courageous.– शूर, वीर, विक्रान्त *adj.* Victorious triumphant.–जेतृ, जिष्णु, जित्वर *adj.*

सांयुगीनो रणे साधुः पृतना वाहिनी चमूः ॥ २८२ ॥

सेना वरूथिनी सैन्यानीकचक्रबलानि च ।

Veteran soldier.– सांयुगीन *m.*

Army, forces.– पृतना, वाहिनी, चमू, सेना, वरूथिनी *f.*; सैन्य, अनीक, चक्र, बल *n.*

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥

Strong, energetic.– ऊर्जस्वल, ऊर्जस्विन् *adj.*

(ऊर्ज *m.*=strength, energy.)

संपत्तिः श्रीश्च लक्ष्मीश्च विपत्त्यां विपदापदौ ॥ २८३ ॥

Riches, wealth, prosperity.– संपत्ति, श्री, लक्ष्मी, संपद् *f.*

Poverty, adversity.– विपत्ति, विपद्, आपद् *f.*

आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ ।

धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ॥ २८४ ॥
इष्वासः पुंसि चाथ स्त्री मौर्वी ज्या शिञ्जिनी गुणः ।

Weapon, missile.– आयुध, प्रहरण, शस्त्र, अस्त्र *n*.

A bow.– धनुस्, चाप *m*. & *n*.; धन्वन्, शरासन, कोदण्ड, कार्मुक *n*.; इष्वास *m*.

The string of a bow.– मौर्वी, ज्या, शिञ्जिनी, गुण *m*.

लक्षं लक्ष्यं शरव्यं च शरसायकमार्गणाः ॥ २८५ ॥
पत्रीषुबाणविशिखा अजिह्मगखगाशुगाः ।

Target, aim.– लक्ष, लक्ष्य, शरव्य *n*.

An arrow.– शर, सायक, मार्गण, पत्रिन्, इषु, बाण, विशिख, अजिह्मग, खग, आशुग *m*.

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥ २८६ ॥
तूण्यां खड्गस्तु निस्त्रिंशचन्द्रहासासिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ॥ २८७ ॥

Quiver.– तूण, उपासङ्ग, तूणीर, निषङ्ग *m*.; इषुधि *m*. *f*.; तूणी *f*.

A sword.– खड्ग, निस्त्रिंश, चन्द्रहास, असि, रिष्टि, कौक्षेयक, मण्डलाग्र, करवाल, कृपाण *m*.

फलकोऽस्त्री फलं चर्म खड्गमुष्टौ त्सरुः पुमान् ।

A shield.– फलक *m.* & *n.*; फल, चर्मन् *n.*
The hilt of a sword.– त्सरु *m.* =खड्गमुष्टि *f.*

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ॥ २८८ ॥
An axe.– कुठार *m.* (or कुठारी *f.*), स्वधिति, परशु, परश्वध *m.*

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ।
A knife.– शस्त्री, असिपुत्री, छुरिका, असिधेनुका *f.*

प्रासस्तु कुन्तः शङ्कुर्ना शल्यमस्त्री गदा स्त्रियाम् ॥२८९॥
A lance.– प्रास, कुन्त *m.*
The pointed end of an arrow.– शङ्कु *m.*; शल्य *m.* & *n.*

A mace.– गदा *f.*

वैतालिका बोधकरा बन्दिनः स्तुतिपाठकाः ।
A bard whose duty is to awake a king at dawn by music or singing.– वैतालिक, बोधकर *m.*

A panegyrist, bard.– बन्दिन्, स्तुतिपाठक *m.*

रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः ॥ २९० ॥
Dust.– रेणु *m.* & *f.*; धूलि *f.*; पांसु *m.*; रजस् *n.*

पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ।

Flag, banner.– पताका, वैजयन्ती, केतन *n.*; ध्वज *m.* & *n.*

अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ।

Emulation for precedence.– अहंपूर्विका *f.*= अहं पूर्वमहं पूर्वमिति यया वदति सा ।

आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ॥ २९१ ॥

Self-exultation, boasting.– आहोपुरुषिका *f.*= दर्पाद्यात्मनि संभावना सा ।

अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः ।

Rivalry, emulation.– अहमहमिका *f.* =परस्परं प्रति योऽहंकारो भवति सः ।

द्रविणं तरस्सहोबलशौर्याणि स्थाम शुष्मं च ॥२९१॥

शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता ।

Bravery, daring, prowess.– द्रविण, तरस्, सहस्, बल, शौर्य, स्थामन्, शुष्म *n.*; शक्ति *f.*; पराक्रम, प्राण *m.*

Extraordinary prowess.– विक्रम *m.*=अति-शक्तिता.

(शक् 5 P. to be able, to endure.)

कलिनी प्रधनं युद्धं संग्रामाहवसंयुगाः ॥

अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥ २९२ ॥

संयत्समित्याजियुधो तुमुलं रणसंकुले ।

War, battle, fight, quarrel.– कलि *m.*; प्रधन, युद्ध *n.*; संग्राम, आहव, संयुग *m.*; समर, अनीक, रण *m.* & *n.*; कलह, विग्रह *m.*; संयत, समिति, आजि, युध *f.*

(युध् 4 A. to fight, to oppose.)

Confusion of battle.– तुमुल *n.*=रणसंकुलम् ।

(तुमुल *adj.* tumultuous, noisy.)

उत्पातस्तूपसर्गः स्याद्बलात्कारो हठस्तथा ॥ २१२ ॥

Omens, portent.– उत्पात, उपसर्ग *m.*

Violence, force.– बलात्कार, हठ *m.*

नियुद्धं बाहुयुद्धेऽथ बृंहितं करिगर्जितम् ।

Duel, boxing, wrestling.– नियुद्ध, बाहुयुद्ध *n.*

The cry or roaring of elephants.–बृंहित, करिगर्जित *n.*

(गर्ज् 1 P. to roar, to thunder.)

व्यूहस्तु बलविन्यासो विस्फारो धनुषः स्वनः॥२१३॥अ

Array of battle.– व्यूह *m.*= बलविन्यासः ।

(विन्यास *m.* arrangement.)

The twang of a bow-string.– विस्फार *m.*= धनुषः स्वनः ।

मूर्च्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनम् ।

Swoon, fainting.– मूर्च्छा *f.*; कश्मल *n.*; मोह *m.*

Devastation, inflicting pain or punishment on an enemy by laying the country waste.– अवमर्द *m.*; पीडन *n.*

अभ्यवस्कन्दनं त्वभ्यासादनं विजयो जयः ॥ २९४ ॥

Assault, attack, besieging.– अभ्यवस्कन्दन, अभ्यासादन.

Victory, triumph, success.– विजय, जय *m.*

(स्कन्द् 1 P. to burst out, to jump; अवस्कन्द् to assail, to besiege; आस्कन्द् to attack.)

(जि 1 P. to conquer, to overpower, to win; with अभि to assail; with परा (Atm.) to defeat; with वि (Atm.) to be victorious. जिगीष *desid.* of जि to desire, to conquer.)

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।

Vengeance, retaliation.– वैरशुद्धि *f.*; प्रतीकार *m.*; वैरनिर्यातन *n.*

अपक्रमोऽपयानं च संद्रावो विद्रवो द्रवः ॥ २९५ ॥

Flight.– अपक्रम *m.*; अपयान *n.*; संद्राव, विद्रव, द्रव *m.*

पराजयः पराभूतिस्त्रिषु नष्टतिरोहितौ ।

Defeat.– पराजय *m.*; पराभूति *f.*

Those who are lost or missing, or have disappeared.– नष्ट, तिरोहित *adj.*

(नश् 4 P. to disappear, to perish.)

निषूदनं निहननं क्षणनं च निहिंसनम् ॥ २९६ ॥
निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उद्वासनप्रमथनक्रथनोज्जासनानि च ॥ २९७ ॥
आलम्भपिञ्जविशरघातोन्माथवधा अपि ।

Killing, destroying.– निषूदन, ...उज्जासन *n.*; आलम्भ, पिञ्ज, विशर, घात, उन्माथ, वध *m.*

[क्षण् 8 P. A. to wound. निषूद् 10 P. to kill. शॄ 9 P. to hurt, to wound; विशॄ *Pass.* to fade away, to be divided. (*p. p.* शीर्ण). हिंस् 1 & 7 P. to destroy, to kill. मन्थ् 9 P. to churn; to crush, to kill; उन्मथ् to agitate.]

स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ॥२९८॥
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ।

Death, perishing.– पञ्चता *f.*; कालधर्म, दिष्टान्त, प्रलय, अत्यय, अन्त, नाश *m.*; मृत्यु *m.* & *f.*; मरण *n.*; निधन *m.* & *n.*

[ली 4 A. & 9 P. (also विली) to vanish, to die, to be dissolved, to be melted; with प्र to be destroyed.]

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ॥ २९९ ॥
मृतप्रमीतौ त्रिष्वेते चिता चित्या चितिः स्त्रियाम् ।

Dead, perished.– परासु, प्राप्तपञ्चत्व, परेत, प्रेत, संस्थित, मृत, प्रमीत *adj*.

A funeral pile.– चिता, चित्या, चिति *f*.
(मृ 6 A. to die).

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धं कलेवरम् ।

A headless trunk.–कबन्ध *m. n.*=क्रियायुक्त &c.
(अपमूर्ध *adj*. headless.)

श्मशानं स्यात्पितृवनं कुणपः शवमस्त्रियाम् ॥ ३०० ॥

A cemetery.– श्मशान, पितृवन *n*.
Corpse, dead body.– कुणप *m*.; शव *m*. & *n*.

प्रग्रहोपग्रहौ बन्द्यां कारा स्याद्बन्धनालये ।

Captivity; imprisonment; seizing, capturing. A prisoner, captive.–प्रग्रह, उपग्रह, *m*.; बन्दी *f*.

Prison.– कारा *f* =बन्धनालय *n*.

पुंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम् ॥३०१॥

Life, the vital winds, soul.– असु, प्राण *m.* & *pl.*

Life, living.– जीव *m.*; असुधारण ***n.***

आयुर्जीवितकालो ना जीवातुर्जीवनौषधम् ।

Life, age or duration of life.– आयुस् *n.*; जीवितकाल *m.*

A drug for re-animating the dead.– जीवातु *m.*= जीवनौषधम् *n.*

इति क्षत्रियवर्गः ।

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ॥२०२॥

The Vaisya caste; a man of the agricultural or mercantile tribe.– ऊरव्य, ऊरुज, अर्य, वैश्य, भूमिस्पृश्, विश् *m.*

आजीवो जीविका वार्त्ता वृत्तिर्वर्तनजीवने ।

Livelihood, profession.– आजीव *m.*; जीविका, वार्त्ता, वृत्ति *f.*; वर्तन, जीवन *n.*

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः॥२०३॥

Agriculture.– कृषि *f.*

Profession of tending cattle, or herds.– पाशुपाल्य *n.*

Trade.– वाणिज्य *n*.

याच्ञयाप्तं याचितकं स्यादृणं पर्युदञ्चनम् ।
उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ॥ २०४ ॥

A borrowed thing, loan.– याचितक *n*.= याच्ञयाप्तम् ।

Debt.– ऋण, पर्युदञ्चन *n*.; उद्धार *m*.

Usury, the profession of money-lenders.– अर्थप्रयोग *m*.; कुसीद *n*.; वृद्धिजीविका *f*.

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

Creditor, money-lender, banker.– उत्तमर्ण, प्रयोक्तृ *adj*.

Debtor.– अधमर्ण, ग्राहक *adj*.

क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः ॥ ॥

A farmer.– क्षेत्राजीव, कर्षक, कृषिक, कृषीवल *m*. or *adj*.

पुंनपुंसकयोर्वप्रः केदारः क्षेत्रमेव च ।

A field, farm.– वप्र *m*. & *n*.; केदार *m*.; क्षेत्र *n*.

लोष्टानि लेष्टवः पुंसि सीत्यं कृष्टं च हल्यवत ॥२०६॥

A clod of earth.– लोष्ट *n*.; लेष्टु *m*.

Ploughed, tilled.– सीत्य, कृष्ट, हल्य *adj*.

प्राजनं तोदनं तोत्रं खनित्रमवदारणे ।

A whip, a lash.- प्राजन, तोदन, तोत्र *n.*

Pick-axe.- खनित्र, अवदारण *n.*

(खन् 1 P. A. to dig; with उत् to dig out, to destroy; with नि to bury).

दात्रं लवित्रं फालस्तु कृषको लाङ्गलं हलम्॥२०७॥
गोदारणं च सीरोऽथ सीता लाङ्गलपद्धतिः ।

A scythe.- दात्र, लवित्र *n.*

Plough-share.- फाल, कृषक *m.*

A plough.- लाङ्गल, हल, गोदारण *n.*; सीर *m.*

A furrow.- सीता *f.*; लाङ्गलपद्धति *f.*

तिलगोधूमचणकयवनीवारशालयः ॥ २०८ ॥
मसूरसर्षपाद्याश्च शमी शिम्बा त्रिपूत्तरे ।
रिद्धमावासितं धान्यं पूतं तु बहुलीकृतम् ॥२०८॥(अ)

Different kinds of corn.- तिल *m.* sesamum; गोधूम *m.* wheat; चणक *m.* gram; यव *m.* barley; नीवार *m.* rice growing wild; शालि *m.* rice. मसूर *m.* A kind of pulse. सर्षप *m.* Mustard.

A legume or pod.- शमी, शिम्बा *f.*

Winnowed & stored (grain &c.).– रिद्ध, आवसित *adj*.

Threshed & winnowed.– पूत, बहुलीकृत *adj*.

धान्यं व्रीहिः स्तम्बकरिः कणिशं सस्यमञ्जरी ।

Corn, grain, seed.– धान्य, व्रीहि, स्तम्बकरि *m*.

Ear of corn.– कणिश *n*.=सस्यमञ्जरी.

कडङ्गरो बुसं क्लीबे धान्यत्वचि तुषः पुमान् ॥२०९॥

Husk.– कडङ्गर *m*.; बुस *n*.; तुष *m*.=धान्यत्वच् *f*.

किंशारुः सस्यशूकं स्यात् स्तम्बो गुच्छस्तृणादिनः ।

The beard or awn of corn.– किंशारु *m*.

Awn, a bristle.– शूक *n*.

A clump or cluster of grass, a sheaf of corn, &c.– स्तम्ब *m*.=तृणादिनः गुच्छः ।

अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम् ।

Pestle for cleansing rice, &c.– अयोग्र *n*.; मुसल *m*. & *n*.

Mortar for the same.– उदूखल, उलूखल *m*.

प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान् ॥२१०॥

A winnowing basket.– प्रस्फोटन *n*.; शूर्प *m*. & *n*.

A sieve, colandar.– चालनी *f*.; तितउ *m*.

स्यूतोऽथ पिटकण्डोलौ पाकस्थानमहानसे ।

Gunny bag, sack.– स्यूत *m*.

A basket.– पिट, कण्डोल *m*.

A kitchen.– पाकस्थान, महानस *n*.

सूदास्तु सूपकाराश्च बल्लवाश्चुल्लिरन्तिका ॥ ३११ ॥

A cook.– सूद, सूपकार, बल्लव *m*.

Fire-place, oven.–चुल्लि, अन्तिका *f*.

हसन्त्यङ्गारशकटी चाङ्गारोऽलातमुल्मुकम् ।

A portable fire-place.– हसन्ती, अङ्गारशकटी *f*.

Charcoal (burning or not), a fireband. –अङ्गार *m*.; अलात, उल्मुक *n*.

कलशस्तु घटो भाण्डे पात्रावपनभाजनम् ॥ ३१२ ॥

An earthen vessel.– कलश, घट *m*.

Vessel, pot.– भाण्ड, पात्र, आवपन, भाजन *n*.

क्लीबेम्बरीषं भ्राष्ट्रो ना कन्दुर्वा स्वेदनी स्त्रियाम् ।

A frying-pan.– अम्बरीष *n*.; भ्राष्ट्र *m*.

A sauce-pan, a vessel for boiling or distilling.– कन्दु *m*. & *f*., स्वेदनी *f*.

पिठरः स्थाल्युखा कुण्डं मणिकः स्यादलञ्जरः॥३१२॥अ

Any cooking vessel.– पिठर *m.*; स्थाली, उखा *f.*; कुण्ड *n.*

A large earthen jar.– मणिक, अलञ्जर *m.*

अस्त्री शाकं हरितकं वेषवार उपस्करः ।

Any leaf, flower, fruit, stalk, root &c. used as a vegetable.– शाक *m.* & *n.*; हरितक *n.*

A condiment, a spice, or seasoning.– वेषवार, उपस्कर *m.*

मरीचं कोलकं कृष्णमथ शुण्ठी महौषधम् ॥३१२॥आ

Pepper.– मरीच, कोलक, कृष्ण *n.*

Ginger.– शुण्ठी, महौषध *n.*

हरिद्रा काञ्चनी पीता लाजाः पुंभूम्नि चाक्षताः ।

Turmeric.– हरिद्रा, काञ्चनी, पीता *f.*

Fried grain.– लाज, अक्षत *m. plu.*

सैन्धवं लवणं खण्डविकारः शर्करा सिता ।

Salt.– सैन्धव, लवण *n.*

Sugar, sugar-candy.– खण्डविकार *m.*; शर्करा, सिता *f.*

चिक्कणं मसृणं स्निग्धं संमृष्टं शोधितं समे ॥ ३१३ ॥

Unctuous, oily, smooth.– चिक्कण, मसृण, स्निग्ध *adj.*

Clean, pure.- संमृष्ट, शोधित *adj.*

ओदनोऽस्त्री भक्तमन्नं पौल्यपूपादिकं तु तत् ।

Food, meals.- ओदन *m.* & *n.*; भक्त, अन्न *n.*

Bread of wheat.- पौलि *f.*

A kind of sweetmeat or food.- अपूप *m.*

घृतमाज्यं हविः सर्पिर्दुग्धं क्षीरं पयः समम् ॥ ३१४ ॥

Ghee.- घृत, आज्य, हविस्, सर्पिस् *n.*

Milk.- दुग्ध, क्षीर, पयस् *m.*

पयस्यं दधितक्रादि नवनीतं नवोद्धृतम् ।

Any thing made of milk.- पयस्य *adj.*
=दधि०. (दधि *n.* curds; तक्र *n.* sour milk.)

Butter.- नवनीत, नवोद्धृत *n.*

म्रक्षणाभ्यञ्जने तैलं गोविट् गोमयमस्त्रियाम् ॥३१५॥

Oil.- म्रक्षण, अभ्यञ्जन, तैल *n.*

Cow-dung.- गोविष् *f.*; गोमय *m.* & *n.*

अशनाया बुभुक्षा क्षुद् ग्रासस्तु कवलः पुमान् ।

Hunger, appetite.- अशनाया, बुभुक्षा, क्षुध् *f.*

A mouthful.- ग्रास, कवल *m.*

तर्षः पिपासा तृड् जग्धिराहारः पुंसि भोजनम्॥३१६॥

Thirst.- तर्ष *m.*; पिपासा, तृष् *f.*

Dinner, meal.– जग्धि *f.*; आहार *m.*; भोजन *n.*

सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनम् ।

Drinking together with equals.– सपीति *f.*; तुल्यपान *n.*

Eating together with equals.– सग्धि *f.*; सहभोजन *n.*

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

Sufficient, enough.– काम, प्रकाम, पर्याप्त, निकाम, इष्ट, यथेप्सित *adj.* & *adv.*

गोपे गोपालगोसंख्यगोधुगाभीरबल्लवाः ॥ ३१७ ॥

A cow-herd, a milkman.– गोप, गोपाल, गोसंख्य, गोदुह्, आभीर, बल्लव *m.* & *f.*

(गां दोग्धि इति गोधुक् =उ० त०)

(दुह् 2 P. A. to milk, to yield milk or other desired object.)

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ।

अनड्वान् सौरभेयो गौर्वृद्धोक्षस्तु जरद्गवः ॥

An ox, a bull.– उक्षन्, भद्र, बलीवर्द, ऋषभ, वृषभ, वृष, अनडुह्, सौरभेय, गो *m.*

An old ox.– जरद्गव, वृद्धोक्ष *m.*

सद्योजातस्तर्णकः स्याद् दम्यवत्सतरौ समौ ॥ ३१८ ॥

A very young calf.– तर्णक *m*. =सद्यो जातो वत्सः।

A young bullock.– दम्य, वत्सतर *m*.

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः।

A beast of burden, one capable of bearing the yoke; prominent.– धूर्वह, धुर्य, धौरेय, धुरीण, धुरंधर *m*. & *adj*.

आपीनमूधो गौरुस्रा सौरभेयी च शृङ्गिणी॥३१९॥

Udder.– आपीन, ऊधस *n*.

A cow.– *गो, उस्रा, सौरभेयी, शृङ्गिणी *f*.

वैशाखमन्थमन्थानोऽप्यथ संदानदामनी।

A churning stick.– वैशाख, मन्थ, *मथिन् *m*.

A rope; the tether of an animal.– संदान, दामन् *n*.

करभाः स्युः शृङ्खलका उष्ट्रस्तु स्यात्क्रमेलकः॥३२०॥

The young of a camel.– करभ, शृङ्खलक *m*.

A camel.– उष्ट्र, क्रमेलक *m*.

मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके।

Sheep, ram.– मेढ्र, उरभ्र, उरण, ऊर्णायु, मेष, वृष्णि, एडक *m*.

(ऊर्णायु from ऊर्णा *f*. wool.)

अजे छागोऽथ बालेया रासभा गर्दभाः खराः ॥३२१॥

A goat (he or she).– अज *m.* (अजा *f.*), छाग *m.* (छागी *f.*)

An ass.– बालेय, रासभ, गर्दभ, खर *m.*

पण्याजीवः सार्थवाहो नैगमो वाणिजो वणिक् ।

A merchant, trader.– पण्याजीव, सार्थवाह, नैगम, वाणिज, वणिज *m.*

विक्रेता क्रायिकस्तौ द्वौ मूल्यं वस्नोऽप्यवक्रयः॥३२२॥

Seller.– विक्रेतृ *m.*

Purchaser.– क्रायिक *m.*

Price, value.– मूल्य *n.*; वस्न, अवक्रय *m.*

[क्री 9 P. A. to buy; विक्री (A.) to sell; परिक्री (A.) to hire.]

नीवी परिपणो मूलधनं लाभोऽधिकं फलम् ।

Capital.– नीवी (or नीवि) *f.*; परिपण *m.*; मूलधन *n.*

Profit.– लाभ *m.* = अधिकं फलम् ।

नैमेयनिमयौ पण्यं विक्रेयं पणितव्यवत् ॥ ३२३ ॥

Barter, exchange.– नैमेय, निमय *m.*

Articles for sale, commodity.– पण्य, विक्रेय, पणितव्य *adj.*

पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम् ।

Deposit.– उपनिधि, न्यास *m*.

The return of a deposit.– प्रतिदान *n*. = न्यासस्यार्पणम् ।

[अर्प (*Cau*. of ऋ) to deliver, to restore.]

विपणो विक्रयः सत्यंकारः सत्यापनं तथा ।

Sale.– विपण, विक्रय *m*.

Ratification of a bargain.– सत्यंकार *m*.; सत्यापन *n*.

मानं तुलाङ्गुलिप्रस्थैः संख्या एकादयस्तथा ॥ ३२४ ॥

Measure.– मान *n*.

तुलामान *n*. measure of weight; अङ्गुलिमान *n*. meaaure of length and area; प्रस्थमान *n*. measure of capacity.

Number.– संख्या *f*.

पादस्तुरीयो भागः स्यादंशभागौ तु वण्टके ।

A quarter.– पाद *m*.=तुरीयो भागः ।

A part, fraction, share.–अंश, भाग, वण्टक *m*.

(भज् 1 P. A. to divide; विभज् to distribute; to divide amongst, to distinguish.)

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ॥ ३२५ ॥

हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ।

Riches, wealth, money.– द्रव्य, वित्त, स्वापतेय, रिक्थ, ऋक्थ, धन, वसु, हिरण्य, द्रविण, द्युम्न *n.*; अर्थ, रै, विभव *m.*

स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते ॥ ३२६ ॥

Treasure, hoard, consisting of ornaments and bullion.– कोश *m.*; हिरण्य *n.*=कृताकृते हेमरूप्ये.

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।
शोणरत्नं लोहितकः पद्मरागोऽथ मौक्तिकम् ॥ ३२७ ॥
मुक्ताथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकम् ।

Emerald.– गारुत्मत, मरकत *n.*; अश्मगर्भ, हरिन्मणि *m.*

Ruby.– शोणरत्न *n.*; लोहितक, पद्मराग *m.*

Pearl.– मौक्तिक *n.*; मुक्ता *f.*

Coral.– विद्रुम *m.*; प्रवाल *m.* & *n.*

हीरकश्चाथ रत्ने स्यान्मणिः स्वर्णे तु काञ्चनम् ॥३२८॥
चामीकरं जातरूपं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं सुवर्णं कनकं तथा ॥ ३२९ ॥
रुक्मं कार्तस्वरं जाम्बुनदमष्टापदोऽस्त्रियाम् ।

Diamond.– हीरक *m.*

A jewel, a precious stone.– रत्न *n.*; मणि *m.* & *f.*

Gold.– स्वर्ण, काञ्चन, चामीकर, जातरूप, हिरण्य, हेमन्, हाटक, तपनीय, शातकुम्भ, सुवर्ण, कनक, रुक्म, कार्तस्वर, जाम्बूनद *n.*; अष्टापद *m.* & *n.*

रूप्यं तु रजतं ताम्रं लोहः कालायसायसी ॥ ३३० ॥
मण्डूरमथ काचोऽथ रसः सूतश्च पारदे ।

Silver.– रूप्य, रजत *n.*

Copper.– ताम्र *n.*

Iron.– लोह *m.*; कालायस, अयस् *n.*

Iron rust.– मण्डूर *n.*

Glass.– काच *m.*

Quick-silver, mercury.– रस, सूत, पारद *m.*

आरकूटोऽस्त्रियां वङ्गे त्रपु नागे च सीसकम् ।

Brass.– आरकूट *m.* & *n.*

Tin.– वङ्ग, त्रपु *n.*

Lead.– नाग, सीसक *n.*

पिचुस्तूलो मधु क्षौद्रं मधूच्छिष्टं तु सिक्थकम् ॥३३१॥

Cotton.– पिचु, तूल *m.*

Honey.– मधु, क्षौद्र *n.*

Bee's wax.– मधूच्छिष्ट *n.*; सिक्थक *n.*

इति वैश्यवर्गः ।

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

The *Sudra* caste.– शूद्र, अवरवर्ण, वृषल, जघन्यज *m.*

कुम्भकारः कुलालः स्यात्पलगण्डस्तु लेपकः ॥ ३३२ ॥

A potter.– कुम्भकार, कुलाल *m.*

A mason.– पलगण्ड, लेपक *m.*

तन्तुवायः कुविन्दः स्यात् तुन्नवायस्तु सौचिकः ।

A weaver.– तन्तुवाय, कुविन्द *m.*

A tailor.– तुन्नवाय, सौचिक *m.*

पादूकृच्चर्मकारः स्याद् व्योकारो लोहकारकः ॥ ३३३ ॥

A shoe-maker, cobbler.– पादूकृत्, चर्मकार *m.*

A black-smith.– व्योकार, लोहकार *m.*

नाडिंधमः स्वर्णकारः कलादो रुक्मकारकः ।

A gold-smith.– नाडिंधम, स्वर्णकार *m.*

A silver-smith.– कलाद, रुक्मकारक *m.*

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् ॥ ३३४ ॥

A carpenter.– तक्षन्, वर्धकि, त्वष्टृ, रथकार, काष्ठतक्ष् *m.*

(तक्ष् 1 & 5 P. to cut to pieces.)

रङ्गाजीवश्चित्रकारः क्षुरी मुण्डी च नापितः ।

A dyer.– रङ्गाजीव, चित्रकार *m.*

A barber.– क्षुरिन्, मुण्डिन्, नापित *m.*
(मुण्ड् 1 P. to shave.)
निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः ॥३३५॥
A washerman.– निर्णेजक, रजक *m.*
A vender of spirituous liquors.– शौण्डिक, मण्डहारक *m.*
जावालः स्यादजाजीवः शिल्पी कारुस्तथा समौ ।
A shepherd.– जावाल, अजाजीव *m.*
An artificer; an artist.– शिल्पिन्, कारु *m.*
नटशैलूषभरताश्चारणास्तु कुशीलवाः ॥ ३३६ ॥
An actor.– नट, शैलूष, भरत *m.*
A strolling player, a panegyrist.– चारण, कुशीलव *m.*
जीवान्तकः शाकुनिको द्वौ वागुरिकजालिकौ ।
मांसिकः कौटिकश्चाथ मालाकारस्तु मालिकः ॥३३७॥
A fowler.– जीवान्तक, शाकुनिक *m.*
A hunts-man.– वागुरिक, जालिक *m.*
A butcher.– मांसिक, कौटिक *m.*
A gardener.–मालाकार, मालिक *m.*
भृतको भृतिभुक् कर्मकरो वैतनिकोऽपि सः ।
A labourer.– भृतक, भृतिभुज्, कर्मकर, वैतनिक *m.*

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ॥ ३३८ ॥
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ।

Low-born, ignoble, worthless.- विवर्ण, पामर, नीच, प्राकृत, पृथग्जन, निहीन, अपसद, जाल्म, क्षुल्लक, इतर *adj.*

भृत्ये दासेरदासेयदासगोप्यकचेटकाः ।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ ३३९ ॥

A servant, a dependent, an attendant.- भृत्य, दासेर, दासेय, दास, गोप्यक, चेटक, नियोज्य, किंकर, प्रैष्य (or प्रेष्य), भुजिष्य, परिचारक *m.*

मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ।
दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ॥३४०॥

Dull, stupid, idle.- मन्द, तुन्दपरिमृज, आलस्य, शीतक, अलस, अनुष्ण *adj.*

Active, clever, careful.- दक्ष, चतुर, पेशल, पटु, सूत्थान, उष्ण *adj.*

चण्डालप्लवमातङ्गा निषादश्वपचावपि ॥ ३४१ ॥

A man of the most degraded caste.- चण्डाल, प्लव, मातङ्ग, निषाद, श्वपच *m.*

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ।

A barbarian, a savage, a man of the

hill tribes.– किरात, शबर, पुलिन्द *m.*

(म्लेच्छ *m.* =A barbarian, a foreigner.)

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ॥३४२॥

A man living by hunting, a forester.– व्याध, मृगवधाजीव, मृगयु, लुब्धक *m.*

कौलेयकः सारमेयः शुनकः श्वा च कुक्कुरः ।

अलर्कः स प्रयोगेण शुनी च सरमा च सा ॥ ३४३ ॥

A dog, cur.– कौलेयक, सारमेय, शुनक, श्वन्, कुक्कुर *m.*

A mad dog.– अलर्क *m.*=योगेनोन्मत्तत्वं प्राप्तः श्वा ।

A bitch.– शुनी, सरमा *f.*

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ।

Hunting, chase.– आच्छोदन, मृगव्य *n.*; आखेट *m.*; मृगया *f.*

चौरपाटच्चरस्तेनदस्युतस्करमोपकाः ॥ ३४४ ॥

A thief, robber, &c.– चौर, पाटच्चर, स्तेन, दस्यु, तस्कर, मोषक *m.*

चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धने ।

A theft, robbing, stealing.– चौरिका *f.*; स्तैन्य, चौर्य *n.*

Thing stolen.– स्तेय, लोप्त्र *n.*=चौर्यधन *n.*

उन्माथः कूटयन्त्रं स्याद्वागुरा मृगबन्धनी ॥ ३४५ ॥

A snare, trap.– उन्माथ *m.*, कूटयन्त्र *n.*

A noose.– वागुरा, मृगबन्धनी *f.*

शुल्वं वराटकं स्त्री तु रज्जुस्त्रिषु वटी गुणः ।

A string, rope, cord.–शुल्ब,वराटक *n.*; रज्जु *f.*, वटी *m. f. n.*; गुण *m.*

उद्घाटनं घटीयन्त्रं सूत्राणि नरि तन्तवः ॥

A wind-lass.– उद्घाटन, घटीयन्त्र *n.*

Thread, fibre.–सूत्र *n.*, तन्तु *m.*

मञ्जूषायां पेटकः स्याद् भारयष्टिर्विहंगिका ॥ ३४६ ॥

A box.– मञ्जूषा *f.*; पेटक *m.*

A Peg in the wall.– भारयष्टि, विहंगिका *f.*

पाञ्चालिका पुत्रिका स्याच्छाणस्तु निकषः कषः ।

A doll, puppet.– पाञ्चालिका, पुत्रिका *f.*

A touch-stone or grind-stone.– शाण, निकष, कष *m.*

उपानत्पादुका पादूरश्वादेस्ताडनी कशा ॥ ३४७ ॥

A shoe.– उपानह्, पादुका, पादू *f.*

A whip, lash.– कशा *f.*=अश्वादेस्ताडनी ।

मूषा भस्त्रा वेधनिका कर्तरी च पृथक् पृथक् ।

A crucible.– मूषा *f.*

A bellows.– भस्त्रा *f.*

A perforater.– वेधनिका *f.*

Scissors.– कर्तरी *f.*

क्रकचः करपत्रं स्याच्छिल्पं कर्म कलादिकम् ॥ ३४८ ॥

A saw.– क्रकच *m.*; करपत्र *n.*

Art in general; manual or mechanical art; articles of art.– शिल्प *n.*=कलादिकं कर्म ।

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्॥३४९

Resemblance, an image, an idol, a picture.– प्रतिमान, प्रतिबिम्ब *n.*; प्रतिमा, प्रतियातना, प्रतिच्छाया, प्रतिकृति, अर्चा *f.*; प्रतिनिधि *m.*

Likeness, comparison.– उपमा *f.*

An image.– उपमान *n.*

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ।
साधारणः समानश्च स्युरुत्तरपदे त्वमी ॥ ३५० ॥
निभसंकाशनीकाशप्रतीकाशोपमादयः ।

Like, similar, equal.– सम, तुल्य, सदृक्ष, सदृश, सदृश्, साधारण, समान *adj.*

The same meaning as above (always used at the end of a compound).– निभ,

संकाश, नीकाश, प्रतीकाश, उपमा, इ०. [तुल् 10 P. to weigh, to compare.]

भृतिः स्त्री पणनिर्वेशौ भर्म मूल्यं च वेतनम् ॥३५१॥

Wages, salary, pay.– भृति *f.*; पण, निर्वेश *m.*; भर्मन्, मूल्य, वेतन *n.*

सीध्वासवौ तु मदिरा हाला कादम्बरी सुरा ।
मधु मद्यं च माध्वीकमवदंशस्तु भक्षणम् ॥ ३५२ ॥

Wine, spirituous liquor.– सीधु, आसव *m.*; मदिरा, हाला, कादम्बरी, सुरा *f.*; मधु, मद्य, माध्वीक *n.*

Anything that excites thirst or relish.– अवदंश *m.*; भक्षण *n.*

शुण्डापानं मदस्थानं मधुवारा मधुक्रमाः ।

A tavern.– शुण्डापान, मदस्थान *n.*

A habitual practice of drinking.– मधुवार, मधुक्रम *m.*

चषकोऽस्त्री पानपात्रमापानं पानगोष्ठिका ॥ ३५३ ॥

A goblet, drinking-cup.– चषक *m.* & *n.*; पानपात्र *n.*

A company for drinking.– आपान *n.*; पानगोष्ठिका *f.*

स्यान्माया शाम्बरी मायाकारश्चाप्यैन्द्रजालिकः ।

Jugglery, magic, illusion.– माया, शाम्बरी *f.*

A juggler.– मायाकार, ऐन्द्रजालिक *m.*

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ।

A gambler.– धूर्त, अक्षदेविन्, कितव, अक्षधूर्त, द्यूतकृत *m.*

(द्यूत pp. of दिव् (दीव्) 4 P. to play, to gamble.)

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ३५४ ॥

Gambling.– द्यूत *m.* & *n.*; अक्षवती *f.*; कैतव *n.*; पण *m.*

पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ।

A wager, stake at play.- पण, ग्लह *m.*

A die.– अक्ष, देवन, पाशक *m.*

अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः ॥ ३५५ ॥

Chess-board.– अष्टापद, शारिफल *n.*

(शारि *m.*=A man at chess.)

A match, cock-fighting.– प्राणिद्यूत *n.*; समाह्वय *m.*

इति शूद्रवर्गः ।

सुकृती पुण्यवान् धन्यो महेच्छस्तु महाशयः ।

Fortunate, lucky, happy.- सुकृतिन्, पुण्यवत्, धन्य *adj.*

Noble-minded, magnanimous, ambitious.-महेच्छ, महाशय *adj.*

हृदयालुः सहृदयो महोत्साहो महोद्यमः ॥ ३५६ ॥

Kind-hearted, benevolent.- हृदयालु, सहृदय *adj.*

Persevering, energetic.-महोत्साह,महोद्यम *m.*

प्रवीणो निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।

कृती च कुशलश्चापि प्रतीक्ष्यः पूज्य एव च ॥ ३५७ ॥

Clever, competent, skilful, proficient, versed.-प्रवीण, निपुण, अभिज्ञ, विज्ञ, निष्णात, शिक्षित, कृतिन्, कुशल *adj.*

Venerable, honourable.- प्रतीक्ष्य, पूज्य *adj.*

(शिक्ष् 1 A. to learn; शिक्षय *Caus.* to teach.)

(ईक्ष् 1 A. to look, to behold, to see; अधीक्ष् to suspect; अपेक्ष् to want, to desire, to intend, to require; अवेक्ष् to perceive, to consider, to mind; प्रत्यवेक्ष् to inspect; समवेक्ष् to

reflect, to pay regards to; उपेक्ष् to disregard, to neglect, to connive at; परीक्ष् to examine; प्रतीक्ष् to wait, to expect; समीक्ष् to consider.)

स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।

Liberal, bounteous.– वदान्य, स्थूललक्ष्य, दानशौण्ड, बहुप्रद *adj.*

जैवातृकः स्यादायुष्मान् सरलोदारदक्षिणाः ॥ ३५८ ॥

Long-lived.– जैवातृक, आयुष्मत् *adj.*

Gentle, sincere, polite.– सरल, उदार, दक्षिण *adj.*

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ।

Jolly, gay, merry.–हर्षमाण, विकुर्वाण, प्रमनस्, हृष्टमानस *adj.*

दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः॥ ३५९ ॥

Sad, depressed, uneasy.–दुर्मनस्, विमनस्, अन्तर्मनस् *adj.*

Longing, eager, ardent.–उत्क, उन्मनस् *adj.*

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ।

Famous, renowned, celebrated.– प्रतीत, प्रथित, ख्यात, वित्त, विज्ञात, विश्रुत *adj.*

(इ 2 P. to go; with अति to surpass, to

transgress; with अधि (*Atm.*) to study, to learn; with अव to understand, to know, to believe; with उत् to rise, to spring up; with उप to approach; with प्रति to learn, to know, to be convinced of, to believe.)

(प्रथ् 1 A. to be famous; *Caus.* प्रथय to celebrate, to make famous, to extend, to show, to praise.)

इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता॥३६०॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः।

Rich, opulent.– इभ्य, आढ्य, धनिन् *adj.*

Lord, master, owner, leader.– स्वामिन्, ईश्वर, *पति; ईशितृ, *अधिभू, नायक, नेतृ, प्रभु, परिवृढ, अधिप *adj.*

(ईशितृ from ईश् 2 A. to be master of, to govern; to be able.)

(अधिप from पा 2 P. to protect, to preserve; *Cau.* पालय to protect.)

लक्ष्मीवान्-लक्ष्मणो मूके चावाक् स्निग्धे तु वत्सलः॥३६१

Prosperous, fortunate, lucky.– लक्ष्मीवत्, लक्ष्मण *adj.*

Dumb.– मूक, अवाच् *adj.*

Affectionate, friendly.– स्निग्ध, वत्सल *adj.* (स्निह् 4 P. to bear affection to; *Cau.* to fascinate, to charm.)

तत्परे प्रसितासक्तावर्थी चोद्युक्त उत्सुकः ।

Intent or bent upon, deligent, anxious, solicitous.– तत्पर, प्रसित, आसक्त, अर्थिन्, उद्युक्त, उत्सुक *adj.*

[सक्त *pp.* of सञ्ज् 1 P. (सजति) to adhere, to be attached; with व्यति to connect mutually; with आ to be attached to, to be engaged in.]

[युज् 7 P. A. to join, to connect, to endow, to direct, to appoint, to employ; *Pass.* to be fit; *Cau.* or 10 P. means the same; with अनु (*Atm.*) to ask; with अभि (*Atm.*) to be accused, to be asked (in law-suit); with उप *Pass.* to be suitable, to be of use, to be necessary; with नि (*Atm.*) to appoint, to order; with प्र (*Atm.*) to employ, to direct; with वि or

विप्र (*Atm.*) to separate, to deprive; with सम् to unite, to endow.]

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ॥

Kind, gracious, compassionate.– दयालु, कारुणिक, कृपालु, सूरत *adj.*

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः॥ ३६२ ॥

Independent, free, unrestrained.– स्वतन्त्र, अपावृत, स्वैरिन्; स्वच्छन्द, निरवग्रह *adj.*

परतन्त्रः पराधीनः परवान्नाथवानपि ।

अधीनो निघ्न आयत्तो दीर्घसूत्रश्चिरक्रियः ॥ ३६३ ॥

Dependent, helpless, subject to.– परतन्त्र, पराधीन, परवत्, नाथवत्, अधीन, निघ्न, आयत्त *adj.*

Lazy, tedious.– दीर्घसूत्र, चिरक्रिय *adj.*

(यत 1 A. to exert oneself, to endeavour; निर्यातय *Cau.* to restore, to return, to pardon.)

[यम् (यच्छ) 1 P. to govern, to restrain, to give; with आ (*Atm.*) to stop, to bend; with व्या (*Atm.*) to exert one's power, to fight, to open wide (one's eyes); with उत् to endeavour, to study; with अभ्युत् to raise, to lift up; with उप *Atm.* to marry;

With नि to stop, to govern, to curb; **with** प्र to offer, to pay.]

जाल्मोऽसमीक्ष्यकारी स्यात् कुण्ठो मन्दः क्रियासु यः ।

Imprudent, thoughtless.– जाल्म, असमीक्ष्यकारिन् *adj.*

Slothful, indolent, (also blunt as weapon).– कुण्ठ *adj.*=यः क्रियासु मन्दः सः ।

बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ॥ ३६४ ॥

Hungry.– बुभुक्षित, क्षुधित, जिघत्सु, अशनायित *adj.*

(क्षुध 4 P. to be hungry.)

समौ स्वात्मंभरिः कुक्षिंभरिर्भक्षकघस्मरौ ।

Selfish.– आत्मंभरि, कुक्षिंभरि *adj.*

Greedy, voracious.– भक्षक, घस्मर *adj.*

लुब्धोऽभिलाषुकस्तृष्णक् समौ लोलुपलोलुभौ ॥३६५

Covetous, greedy.– लुब्ध, अभिलाषुक, तृष्णज् *adj.*

Very greedy.– लोलुप, लोलुभ *adj.*

(लुभ 4 P. to covet, to desire; *Cau.* to allure, to entice away; with प्रवि it means the same.)

(अभि शपुक from लप् 1 P. with अभि to desire.)

सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः ।

A drunkard, a sot.– सोन्माद, उन्मदिष्णु *adj.*

Immodest, insolent.– अविनीत, समुद्धत *adj.*

मत्ते शौण्डोत्कटक्षीबाः सान्द्रः स्निग्धश्च मेदुरः ॥ ३६६

Intoxicated.– मत्त, शौण्ड, उत्कट, क्षीब *adj.*

Soft, thick, smooth.– सान्द्र, स्निग्ध, मेदुर *adj.*

कम्रः कामयिताऽभीकः कामुकः कामनोऽनुकः ।

Desirous, longing, courting.– कम्र, कामयितृ, अभीक, कामुक, कामन, अनुक *adj.*

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ ३६७ ॥

Obedient, dutiful.– विधेय, विनयग्राहिन्, वचनेस्थित, आश्रव *adj.*

वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ।

Modest, gentle.– वश्य, प्रणेय, निभृत, विनीत, प्रश्रित *adj.*

(भृ 3 P. A. to bear, to hold, to wear, to nourish, to fill.)

[श्रि 1 P. A. to go, to enter; with आ to have recourse to, to take refuge, to inhabit, to depend upon; with उत (*Atm.*) to

rise, to raise; with सम् to unite, to attain.]

धृष्टे धृष्णग् वियातश्च प्रगल्भः प्रतिभान्विते ॥ ३६८ ॥

Bold, audacious, officious.– धृष्ट, धृष्णज्, वियात *adj*.

Prompt, ready, confident.– प्रगल्भ, प्रतिभान्वित *adj*.

(धृष् 1 & 5 P. to be bold, to dare; with अभि *Cau*. to overpower, to confront, to face.)

स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते ।

Bashful, shy.– अधृष्ट, शालीन *adj*.

Astonished, surprised.– विलक्ष, विस्मयान्वित *adj*.

(स्मि 1 A. to smile; with वि to be surprised; to admire.)

अधीरे कातरस्त्रस्ते भीरुभीरुकभीलुकाः ॥ ३६९ ॥

Perplexed, overcome by fear or hunger.–अधीर, कातर *adj*.

Frightened, terrified, timid.– त्रस्त, भीरु, भीरुक, भीलुक *adj*.

(त्रस् 1, 4 P. to tremble, to be afraid of;

with अप to shrink, to retire in fear.)

शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुस्तु वर्धनः ।

Ferocious, cruel.– शरारु, घातुक, हिंस्र *adj.*

Growing, thriving.– वर्धिष्णु, वर्धन *adj.*

(वृध् 1 A. to grow, to increase, to prosper; with परि *Cau.* to rear, to breed up.)

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी॥३७०॥

